

# संस्कृतभाषा अभ्यासपुस्तिका

## वेदभूषणपञ्चमवर्षम् / पूर्वमध्यमा द्वितीयवर्षम् / कक्षा दशमी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड


(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।
तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय॥
मातृवत्परदारेषु परद्रव्येषु लोष्टवत्।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः॥
आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः।
उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।
आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।
सहसा विदधीत न क्रियाम्।
विद्याधनं सर्वधनप्रधानम्।
हितं मनोहारि च दुर्लभं वचः।
अहो दुरन्ता बलवद्विरोधिता।










महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)
(भारतसर्वकारस्य शिक्षामन्त्रालयः)
Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

# प्रथमः पाठः

## संहतिः कार्यसाधिका

संस्कृतसाहित्ये संस्कृतकथाया नीतिकथायाश्च महत्तमं स्थानं दरीदृश्यते। नीतिकथासाहित्ये हितोपदेशोऽन्यतमं स्थानमाप्नोति। ग्रन्थोऽयं विपश्चिता नारायणेन प्राणायि। अस्य हितोपदेशस्य चत्वारः परिच्छेदाः उपलभ्यन्ते यथा- (१) मित्रलाभः (२) सुहृद्भेदः (३) विग्रहः (४) सन्धिश्च। अत्र विविधकथामाध्यमेन नीतिशास्त्रस्य सामाजिकनियमानां शिक्षा प्रदत्ता। गद्यं पद्यञ्च उभयसमन्वितो हितोपदेशः। इह प्रमुखतया सङ्घः कार्यसाधनाय कल्पते, अतः संघटनं करणीयम्। इत्यंशं कविरुपस्थापयति।

**कथा-**

अस्ति गोदावरीतीरे विशालः शाल्मली तरुः। तत्र नानादिग्देशाद् आगत्य रात्रौ पक्षिणो निवसन्ति। अथ कदाचिद् प्रातःकाले लघुपतनकनामा वायसः प्रबुद्धः, यमराजनमिव द्वितीयमायान्तं व्याधमपश्यत्। तमवलोक्याचिन्तयत् - 'अद्य प्रातः एव अनिष्टदर्शनं जातम्, न जाने किमनभिमतं दर्शयिष्यति।' इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः। अथ तेन व्याधेन तण्डुलकणान्विकीर्य जालं विस्तीर्णम्। स च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तां-स्तण्डुलकणानवलोकयामास। ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान्प्रत्याह 'कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः? भद्रमिदं न पश्यामि प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम्।

कपोता ऊचुः - कथमेतत् ? सोऽब्रवीत् - अहमेकदा दक्षिणारण्ये चरन्नपश्यम्। कश्चित् वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रुते- 'भो भोः पान्थाः। इदं सुवर्णकंकणं गृह्यताम्।' ततो लोभाकृष्टेन केनचित् पान्थेनालोचितम् - भाग्येनैतत्सम्भवति। किन्त्वस्मिन्नात्मसन्देहे प्रवृत्तिर्न विधेया। यतः -

**अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।**
**यत्रास्ति विषसंसर्गोऽमृतं तदपि मृत्यवे॥**

तन्निरूपयामि तावत्। प्रकाशं ब्रूते - कुत्र तव कङ्कणम् ? व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत् - कथं मारात्मके त्वयि विश्वासः ? व्याघ्र उवाच - शृणु रे पान्थ ! प्रागेव यौवनदशायामतिदुर्वृत्त आसम्। अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च। वंशहीनश्चाहम्। ततः केनचिद्धार्मिकेणाहमादिष्टः -

"दानधर्मादिकं चरतु भवान्"। तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तः कथं न विश्वासभूमिः ? यतः -

**इज्याऽध्ययनदानानि तपः सत्यं धृतिः क्षमा।**
**अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥**

मम चैतावाँल्लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद् दातुमिच्छामि। तथापि 'व्याघ्रो मानुषं खादति' इति लोकोपवादो दुर्निवारः।

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण। ततो यावदसौ तद्वचः - प्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् - अहह, महापङ्के पतितोऽसि। अतस्त्वामहमुत्थापयामि। इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः, स पान्थोऽचिन्तयत् -

**न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः।**
**स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः॥**

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च। अतोऽहं ब्रवीमि - कङ्कणस्य तु लोभेन इत्यादि। अतः सर्वथाऽविचारितं कर्म न कर्तव्यम्।

एतद्वचनं श्रुत्वा कश्चित्कपोतः सदर्पमाह - 'आः, किमेवमुच्यते ?'

**वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते।**
**सर्वत्रैव विचारे तु भोजनेऽप्यप्रवर्तनम्॥**

एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टाः। अनन्तरं सर्वे जालेन बद्धा बभूवुः। ततो यस्य वचनात्तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति। तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच - 'नायमस्य दोषः।'

विपत्काले विस्मय एव कापुरुषलक्षणम्। तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्। इदानीमप्येवं क्रियताम् । सर्वैरेकचित्तीभूय जालमादायोड्डीयताम्। यतः -

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥**

इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः। अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः - 'किमिदानीं कर्तुमुचितम् ?' चित्रग्रीव उवाच तदस्माकं मित्रं हिरण्यको नाम मूषकराजो गण्डकीतीरे चित्रवने निवसति, सोऽस्माकं पाशांश्छेत्स्यति इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः। हिरण्यकश्च सर्वदाऽपायशङ्कया शतद्वारं विवरं कृत्वा निवसति। ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः। चित्रग्रीव उवाच - 'सखे हिरण्यक ! किमस्मान्न सम्भाषसे ?'। ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससंभ्रमं बहिर्निःसृत्याब्रवीत् - 'आः, पुण्यवानस्मि। प्रियसुहृन्मे चित्रगीवः समायातः।

पाशबद्धांश्चैतान्दृष्ट्वा सविस्मयः क्षणं स्थित्वोवाच - 'सखे ! किमेतत् ? चित्रग्रीवोऽवदत् - 'सखे ! अस्माकं प्राक्तनजन्मकर्मणः फलमेतत्।

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति। चित्रग्रीव उवाच - 'मित्र ! मा मैवम्। अस्मदाश्रितानामेषां तावत्पाशांश्छिन्धि, तदा मम पाशं पश्चाच्छेत्स्यसि। हिरण्यकोऽप्याह - 'अहमल्पशक्तिः दन्ताश्च मे कोमलाः। तदेतेषां पाशांश्छेत्तुं कथं समर्थः ? तद्यावन्मे दन्ता न त्रुट्यन्ति तावत्तव पाशं छिनद्मि। तदनन्तरमेषामपि बन्धनं यावच्छक्यं छेत्स्यामि। चित्रग्रीव उवाच - 'अस्त्वेवम्। तथापि यथाशक्त्येतेषां बन्धनं खण्डय। हिरण्यकेनोक्तम् - आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां सम्मतम्।

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः, पुलकितः सन्नब्रवीत् - साधु मित्र ! साधु। अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते। एवमुक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि। ततो हिरण्यकः सर्वान्सादरं संपूज्याह - सखे चित्रग्रीव ! सर्वथात्र जालबन्धनविधौ दोषमाशङ्क्यात्मन्यवज्ञा न कर्तव्या।

इति प्रबोध्यातिथ्यं कृत्वालिङ्ग्य च चित्रग्रीवस्तेन सम्प्रेषितो यथेष्टदेशान्सपरिवारो ययौ। हिरण्यकोऽपि स्वविवरं प्रविष्टः।

**अभ्यासप्रश्नाः**

1. हितोपदेशस्य रचयिता क: ? तथा च हितोपदेशे कति परिच्छेदा: सन्ति ? तेषां नामानि लिखत।
2. ''संहति: कार्यसाधिका'' अत्र केषां मित्राणां कथा वर्तते ?
3. नानादिग्देशादागत्य रात्रौ पक्षिण: कुत्र निवसन्ति ?
4. वायसस्य, कपोतस्य, मूषकस्य च नाम किम् ?
5. पाठसारं संस्कृतभाषया दशवाक्यै: लिखत ।

# द्वितीयः पाठः

## यमनचिकेतसोः सम्भाषणम्

प्रस्तुतोऽयं पाठ्यांशः कृष्णयजुर्वेदस्य कठशाखायाः कठोपनिषदः स्वीकृतोऽस्ति। अस्यामुपनिषदि द्वावध्यायौ तथा प्रत्येकमध्याये तिस्रो वल्ल्यः सन्ति, एवमाहत्य षड् वल्ल्यो वर्तन्ते। अत्रोपनिषदि नवदशोत्तरैकशतं (११९) मन्त्रास्सन्ति। अस्यामुपनिषदि यम-नचिकेतसोः ब्रह्मविद्यासम्बद्धः संवादो विद्यते। अत्र उभयोः संवादेन आत्मविद्यायाः सुष्ठु ज्ञानं प्रतिपादितम्। तत्र यमो नचिकेतसे त्रीन् वरान् प्रददाति। तत्र तृतीयवररूपेण आत्मतत्त्वज्ञानं प्रदीयते।

गौतमवंशीयमहर्षेः अरुणस्य पुत्रः महर्षिरुद्दालकः 'विश्वजित्' नाम यज्ञश्चकार। उद्दालकः तस्य यज्ञस्य दक्षिणायै दुग्धरहिताः प्रजननशक्तिरहिताः इन्द्रियरहिताश्च गाः ददासीत्, ताः दृष्ट्वा नचिकेताः खिन्नमनस्को बभूव, तदा स पितरमपृच्छत् भोः पितः! मां कस्मै दास्यसीति वारत्रयं प्रश्नमिमम् अपृच्छत्। पिता क्रुध्यन्नकथयत् - मृत्यवे त्वा ददामीति।

नचिकेताः पितुराज्ञां सहर्षं स्वीकृत्य यमलोकं प्राप्नोत्, तत्र यमराजः मृत्युलोके नासीत्। नचिकेताः बहिरेव अन्नजलं विनैव रात्रित्रयं यावत् प्रतीक्षामकरोत्। यदा यमराजः प्रत्यागतः तदा स नचिकेतसः जलान्नरहितां प्रतीक्षां ज्ञात्वा रात्रित्रयस्य प्रतीक्षायाः कृते अतिथेः सम्मानार्थं वरत्रयाय न्यवेदयत्।

ततः नचिकेताः **प्रथमं वरं** पितुः प्रसन्नार्थं शान्त्यर्थं च अयाचत, **द्वितीयं वरम्** अग्निविद्यायाः ज्ञानमयाचत, येन सः अत्यन्तं सुखपूर्वकं स्वर्गलोके भयरहितः स्थातुं शक्नोति। नचिकेतसो विलक्षणां प्रतिभां वीक्ष्य यमराजः प्रसन्नो भूत्वा अग्निविद्या एव नचिकेता इति नाम्ना प्रसिद्धो भूयात् इत्यवदत्।

नचिकेताः तृतीयं वरं वृण्वन् कथयति यदा मनुष्यः मृत्युं प्राप्नोति तदा जनाः संशयापन्ना भवन्ति, केचन कथयन्ति अयमात्मा केचन नायमात्मा इति त्वयादिष्टोऽहं आत्मविषयकज्ञानं तृतीयवररूपेण इच्छामि।

यदा यमो नचिकेतसः आत्मज्ञानविषयकं तृतीयं वरदानम् अशृणोत् तदा यमराज अकथयत् सूक्ष्मतमं ज्ञानमिदं न हि सुज्ञेयं अतः मर्त्यलोके ये दुर्लभाः कायाः तान् स्वेच्छया प्रार्थयस्व। नचिकेताः प्रत्युदतरत्- अहं त्वां दृष्टवान् अतः धनमायुश्च तव इच्छया प्राप्नोम्येव अतः वरणीयः वरस्तु आत्मज्ञानमेव। यथा -

**न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।**
**जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव॥ १.१.२७॥**

हे मृत्युदेव ! सामान्यजनेन कथितेन बहुधा चिन्तितेन च एतत् ज्ञानं न सुविज्ञेयम्, अपितु तत्त्वज्ञानयुक्तो जनः यदा नोपदिशति तदा नास्ति गतिरन्यस्य आयुः प्रमाणात् अतिसूक्ष्मत्वाच्च। बुद्धिमान् जनः अध्यात्मयोगमाध्यमेन दुर्विज्ञेयं सर्वत्र व्याप्तं गभीरं बुद्धिरूपगुहायां स्थितं सनातनदिव्यगुणोपेतम् आत्मानं ज्ञात्वा हर्षशोकं जहाति। एवंभूतो धीरो जनो योग्यम् उपदेशं श्रुत्वा गभीरतया चिन्तयित्वा च तत्त्वज्ञानमादातुं शक्नोति स एव अधिकारी भवति तथा त्वमसि, अतो यत् परमतत्त्वमस्ति तत् कथयामि।

**सर्वे वेदा यत्पदमामनन्ति तपाँसि सर्वाणि च यद्वदन्ति।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदँ संग्रहेण ब्रवीम्योमित्येतत्॥ १.२.१५॥**

सर्वे वेदाः यत् पदं निगदन्ति सर्वे तपांसि यत् पदं ब्रुवन्ति यदिच्छन्तः ब्रह्मचर्यं चरन्ति तत्पदं संग्रहरूपेण "ॐ" इति एतत्। एतदक्षरं ब्रह्म ज्ञात्वा यः यदिच्छति तथा प्राप्नोति। ओमिति श्रेष्ठः आधारः सर्वोत्कृष्टश्च एतत् ज्ञात्वा जनः ब्रह्मलोकमवाप्नोति -

**एतदालम्बनँ श्रेष्ठमेतदालम्बनं परम्।**
**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥ १.२.१७॥**

तथा ज्ञानवान् जनो (आत्मा) न जायते, न म्रियते, अजन्मा, नित्यः, सनातनः, शरीरस्य नाशे सत्यपि न म्रियते।

**न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ १.२.१८॥**

अयमात्मा प्रवचनेन न लभ्यो, ज्ञेयो न मेधया ग्रन्थार्थधारणशक्त्या, न बहुना श्रुतेन। तर्हि केन लभ्यम् इति चेत् यं स्वात्मानमेव साधकः वृणुते प्रार्थयते तेनैवात्मा लभ्य इति ज्ञायते।

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।**
**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम्॥ १.२.२३॥**

**अभ्यासप्रश्ना:**

1. कृष्णयजुर्वेदस्य कठोपनिषदि कति वल्लय: कति मन्त्राश्च सन्ति ?
2. क: विश्वजित् नाम याज्ञश्चकार ?
3. नचिकेता: कति वरान् यमात् प्राप्तवान् तान् यथाक्रमं वर्णयत ।
4. मनुष्य: केन तर्पणीय: न ?
5. नचिकेता: किमर्थं यमलोकं गच्छति ? इति वर्णयत ।

# तृतीयः पाठः

## द्विकर्मकधातवः

**अकथितं च** *(पा.सू. १.४.५१)*

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। अर्थाद् अपादानस्य, सम्प्रदानस्य, करणस्य, अधिकरणस्य च यस्य कारकस्य कथनस्य इच्छा न भवति, तस्य कर्मसंज्ञा भवति। संस्कृतभाषायां तादृशाः षोडशधातावः सन्ति -

**दुह्-याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम्।**
**कर्मयुक्स्यादकथितं तथा स्यान्नी-हृ-कृष्-वहाम्॥**

एषां धातूनां प्रयोगे एकं तु मुख्यं कर्म भवति अपरञ्च अपादानादिकारकैः अविवक्षितं गौणं कर्म भवति। अस्मिन् गौणे कर्मणि एव अत्र द्वितीया विभक्तिः भवति। इमे धातवः एव द्विकर्मकधातवः कथ्यन्ते, एतेषां प्रयोगोऽत्र क्रियते -

| | | | |
|---|---|---|---|
| १. | दुहँ प्रपूरणे | - | गोपालः गां दोग्धि पयः। |
| २. | याचृँ याञ्चायाम् | - | वामनो बलिं याचते वसुधाम्। |
| ३. | डुपचष् पाके | - | पाचकः तण्डुलानोदनं पचति। |
| ४. | दण्डँ दण्डनिपाते | - | भूपतिः गर्गान् शतं दण्डयति। |
| ५. | रुधिर् आवरणे | - | श्रीकृष्णो गां व्रजम् अवरुणद्धि। |
| ६. | प्रच्छँ ज्ञिप्सायाम् | - | सः माणवकं पन्थानं पृच्छति। |
| ७. | चिञ् चयने | - | मोहनः वृक्षं फलानि अवचिनोति। |
| ८. | ब्रूञ् व्यक्तायां वाचि | - | गुरुः शिष्यं धर्मं ब्रूते। |
| ९. | शासुँ अनुशिष्टौ | - | उपाध्यायः माणवकं धर्मं शास्ति। |
| १०. | जि जये | - | यज्ञदत्तो देवदत्तं शतं जयति। |
| ११. | मन्थँ विलोडने | - | अयं क्षीरनिधिं सुधां मथ्नाति। |
| १२. | मुषँ स्तेये | - | चौरः देवदत्तं धनं मुष्णाति। |
| १३. | णीञ् प्रापणे | - | बालकः अजां ग्रामं नयति। |
| १४. | हृञ् हरणे | - | इयं कृष्णं धनं हरति। |
| १५. | कृषँ विलेखने | - | कृषकः क्षेत्रं महिषीं कर्षति। |

१६. वहँ प्रापणे - कृषकः ग्रामं भारं वहति।

## विवरणम् -

एते प्रयोगाः द्विकर्मका विद्यन्ते। एकं मुख्यं कर्म अपरं च गौणं कर्म भवति। यथा प्रथमोदाहरणे 'पयः' मुख्यं कर्म 'ग्राम' इति गौणं कर्म । एवमेव अन्यत्रापि क्रियया यस्य साक्षात् सम्बन्धः तत् मुख्यं कर्म बोध्यम्।

अन्ये प्रयोगाः -

१. अधिकारिणः श्रमिकान् कार्यं कथयन्ति।

२. भिक्षुकाः श्रेष्ठिनं धनं भिक्षते।

३. साधुः नागरिकान् हितम् उपदिशति।

## द्विकर्मकस्थले कर्मणि प्रयोगः

**"द्विकर्मकाणां तु गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।"**

इमानि द्विकर्मकवाक्यानि कर्मणि प्रयोगे (कर्मवाच्ये) एवं प्रयोक्तव्यानि -

| | | | |
|---|---|---|---|
| १. | **गोपालः गां पयो दोग्धि।** | १. | **गोपालेन गौः पयः दुह्यते।** |
| २. | वामनः बलिं वसुधां याचते। | २. | वामनेन बलिः वसुधां याच्यते। |
| ३. | पाचकः तण्डुलान् ओदनं पचति। | ३. | पाचकेन तण्डुलाः ओदनं पच्यन्ते। |
| ४. | राजा गर्गान् शतं दण्डयति। | ४. | राज्ञा गर्गाः शतं दण्ड्यन्ते। |
| ५. | गोपः गां व्रजम् अवरुणद्धि। | ५. | गोपेन गां व्रजः अवरुध्यते। |

**गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामाणि कर्ता स णौ** *(पा. सू. १.४.५२)*

गत्याद्यर्थानां शब्दकर्मणाम् अकर्मकाणां च अणौ यः कर्ता स णौ कर्म स्यात्। गतिः गमनम्। बुद्धिः अवगमनम्। प्रत्यवसानं भक्षणम्। शब्दकर्मा- शब्दः कर्म येषां ते शब्दकर्माणः। अकर्मकः- यस्य धात्वर्थस्य कर्म एव न सम्भवति स इति। अणि - अण्यान्तावस्थायाम्। णौ - ण्यन्तावस्थायां (प्रेरणावस्थायां) इत्यर्थः। अर्थात् गत्यर्थक-बुद्ध्यर्थक-प्रत्यवसानार्थक-शब्दकर्मणाम्-अकर्मकाणां धातूनां प्रयोगे अण्यन्तावस्थायाः कर्त्ता ण्यन्तावस्थायां कर्म भवति।

**उदाहरणम् -**

| अर्थः | अण्यन्तावस्था | ण्यन्तावस्था | कर्ता (अणौ) | कर्म (णौ) |
|---|---|---|---|---|
| **गत्यर्थकः** | शत्रवः स्वर्गमगच्छन्। | हरिः शत्रून् स्वर्गम् अगमयत्। | शत्रवः | शत्रून् |

| | | | | |
|---|---|---|---|---|
| **बुद्ध्यर्थकः** | स्वे वेदार्थम् अविदुः। | हरिः स्वान् वेदार्थम् अवेदयत्। | स्वे | स्वान् |
| **प्रत्यवसानार्थः** | देवाः अमृतम् आश्नन्। | हरिः देवान् अमृतम् आशयत्। | देवाः | देवान् |
| **शब्दकर्मा** | विधिः वेदम् अध्यैत। | हरिः विधिं वेदम् अध्यापयत्। | विधिः | विधिम् |
| **अकर्मकः** | पृथ्वी सलिले आस्त। | हरिः पृथ्वीं सलिले आसयत्। | पृथ्वी | पृथ्वीम् |

**ण्यन्तस्य कर्मणिप्रयोगः -**

बुद्ध्यर्थकस्य, भक्षणार्थकस्य, शब्दकर्मकाणाञ्च प्रयोज्यकर्मणि प्रधानकर्मणि वा लकारो भवति। एतां स्त्रीन् विहाय अन्येषां प्रयोज्यकर्मणि लकारो विधीयते। (अण्यन्तावस्थायां यः कर्ता स एव ण्यन्तावस्थायां प्रयोज्यकर्म भवति। यथा - शिष्यः मन्त्रार्थं बुध्यते। आचार्यः शिष्यं मन्त्रार्थं बोधयति। इह द्वितीयवाक्ये शिष्यः प्रयोज्यकर्म तथा मन्त्रार्थः इति प्रधानकर्म। एवमन्यत्रापि अवधेयम्।

**गत्याद्यर्थकानां ण्यन्तस्य कर्मणिप्रयोगज्ञानाय कोष्ठकः -**

| | |
|---|---|
| **१. आचार्यः शिष्यं सूत्रार्थं बोधयति।** | **१. आचार्येण शिष्यः सूत्रार्थं बोध्यते। / आचार्येण शिष्यं सूत्रार्थो बोध्यते।** |
| **२. जननी बालं दुग्धं पाययति।** | २. जनन्या बालो दुग्धं पाय्यते। / जनन्या बालं दुग्धं पाय्यते। |
| **३. शिक्षकः अन्तेवासिनं ऋचम् उच्चारयति।** | ३. शिक्षकेण अन्तेवासी ऋचम् उच्चार्यते। / शिक्षकेण अन्तेवासिनं ऋग् उच्चार्यते। |
| **४. जनकः पुत्रं पाठशालां गमयति।** | ४. जनकेन पुत्रः पाठशालां गम्यते। |

**अभ्यासप्रश्नाः**

1. संस्कृतभाषायां द्विकर्मकधातूनां संख्या कति ? के च ते ?
2. ''गतिबुद्धिप्रत्यवसा..............''सूत्रपूर्तिं कृत्वा सोदाहरणं व्याख्यायत ।
3. ण्यन्तावस्था का ? उदाहरणपुरस्सरं लिखत ।
4. 'गा दोग्धि पयः' वाक्यमिदं कर्मणि परिवर्तयत ।

# चतुर्थः पाठः

## कोशपरिचयः

प्राचीनकाले महर्षिः कश्यपो वेदानां दुर्बोधशब्दसमुदायं संगृह्य 'निघण्टु' नामकं वैदिककोषं रचयामास। निघण्टुग्रन्थस्थान् क्लिष्टान् शब्दान् सारल्येन बोधयितुं यास्कमुनिः निघण्टुव्याख्याभूतं निरुक्तनामकं ग्रन्थं प्राणयत्।

लौकिकसंस्कृतकोशपरम्परायां सम्प्रत्युपलभ्यमानेषु कोशग्रन्थेषु अत्यन्तं प्रधानः प्राचीनतमः प्रसिद्धतमश्च कोशः अमरसिंहविरचितः नामलिङ्गानुशासननामधेयः अमरकोशः। अमरसिंहः पूर्वकोशानामाधारं गृहीत्वा नामलिङ्गानुशासनं (अमरकोशं) व्यरचयत्। काण्डत्रयात्मकोऽयम् अमरकोशः।

अमरकोशस्य प्रथमे काण्डे दशवर्गा वर्तन्ते। ते च स्वर्ग-व्योम-दिक्-काल-धी-शब्दादि-नाट्य-पाताळभोगि-नरक-वारिवर्गाः। स्वर्गवर्गे - ७१, व्योमवर्गे -१, दिग्वर्गे-३५, कालवर्गे- ३१, धीवर्गे -१७, शब्दादिवर्गे -२५.१/२, नाट्यवर्गे - ३८, पाताळभोगिवर्गे - ११, नरकवर्गे -३.१/२, वारिवर्गे -४५, श्लोकाः आहत्य अस्मिन् काण्डे २७८ अनुष्टुप्छन्दसि श्लोकाः सन्ति।

द्वितीयकाण्डे पृथ्वी-पुर-शैल-वनौषधि-सिंहादि-नृ-ब्रह्म-क्षत्रिय-वैश्य-शुद्राः इति दश वर्गा विद्यन्ते।

भूमिवर्गे - १८, पुरवर्गे - २०, शैलवर्गे - ८, वनौषधिवर्गे -१६९.१/२, सिंहादिवर्गे - ४३, मनुष्यवर्गे - १३९.१/२, ब्रह्मवर्गे - ५७.१/२, क्षत्रियवर्गे - ११९.१/२, वैश्यवर्गे - १११, शूद्रवर्गे - ४६.१/२ श्लोकाः, आहत्य काण्डेऽस्मिन् ७३२.१/२ अनुष्टुप्छन्दसि श्लोकाः विद्यन्ते।

तृतीये काण्डे विशेष्यनिघ्न-संकीर्ण-नानार्थ-अव्ययलिङ्गादिसङ्ग्रहाश्चैते पञ्चवर्गाः सन्ति। विशेष्यनिघ्नवर्गे - ११२, संकीर्णवर्गे - ४२.१/२, नानार्थवर्गे - २५६.१/२, अव्ययवर्गे - २३, लिङ्गादिसङ्ग्रहवर्गे - ४६ श्लोकाः सन्ति। आहत्य ४८० अनुष्टुभा बद्धाः श्लोकाः वर्तन्ते। अस्मिन् अमरकोशे १४९०.१/२ अनुष्टुभा बद्धाः श्लोकाः विद्यन्ते। २२५ श्लोकेषु नानार्थवर्णनं विद्यते। अवशिष्टभागे समानार्थाः शब्दाः सन्ति।

अमरकोशस्य चत्वारि नामान्तराणि भवन्ति। यथा- नामलिङ्गानुशासनम्, त्रिकाण्डचिन्तामणिः, देवकोष, अमरकोशश्च।

अन्येषु बहुषु कोशेषु विद्यमानेष्वपि अमरकोशस्य मान्यता लोकप्रियता च सर्वत्र वरीवर्ति। अत्र कारणमेतद् यत् केचित् कोशग्रन्थाः केवलं पर्यायशब्दान् अपरे केवलं नानार्थशब्दान् एव व्यवृण्वन्, किन्तु अमरसिंहः तद्रचिते ग्रन्थे प्रत्येकं शब्दानां सुस्पष्टानर्थान् प्रादर्शयत्। इमे प्रसिद्धाः कोशाः सन्ति -

| | कोषाः | रचयितारः |
|---|---|---|
| १. | निरुक्तम् | यास्काचार्यः |
| २. | नामलिङ्गानुशासनम् | अमरसिंहः |
| ३. | वाचस्पत्यम् | तारानाथतर्कवाचस्पतिः |
| ४. | भावप्रकाशः | भावमिश्रः |
| ५. | अभिधानरत्नमाला | हलायुधः |
| ६. | शब्दकल्पद्रुमः | राधाकान्तदेवबहादुरः |
| ७. | उणादिकोषः | रामशर्मा |
| ८. | त्रिकाण्डशेषः | पुरुषोत्तमदेवः |
| ९. | अभिधानचिन्तामणिः | हेमचन्द्रः |
| १०. | वैजयन्ती | यादवप्रकाशाचार्यः |
| ११. | अव्ययकोषः | महादेवः |
| १२. | नानार्थशब्दकोषः | मेदिनीकरः |
| १३. | निघण्टुः | महर्षिः कश्यपः |
| १४. | वैदिककोशः | डॉ. सूर्यकान्तः |
| १५. | न्यायकोशः | वामनाचार्यः झलकीकरः |
| १६. | संस्कृत-वाङ्मय-कोशः | डॉ. श्रीधर-भास्कर-वर्णेकरः |
| १७. | शिवराम आप्टे कोशः | शिवरामः |

**अभ्यासप्रश्नाः**

1. प्रसिद्धानां दशकोशग्रन्थानां नामानि लिखत ।
2. शब्दमहत्त्वविषये पतञ्जलिः किमुक्तम् ?
3. अमरकोशस्य कति नामानि प्रसिद्धानि ? कानि च तानि ?
4. अमरकोशस्य त्रिषु काण्डेषु क्रमशः कति-कति वर्गाः सन्ति ?

# पञ्चमः पाठः

# रामस्य करुणो रसः

महाकविः भवभूतिः (श्रीकण्ठः) दक्षिणभारतस्य पद्मपुरनामके नगरे जन्म अलभत। अस्य गुरुरासीत् कुमारिलभट्टः। प्रायः वीरश्रृङ्गार-रसप्रधाने काव्यजगति भवभूतिः करुणं रसम् आश्रित्य नाटकमरचयत्। अत एव उक्तम् "कारुण्यं भवभूतिरेव तनुते"। कवेः तिस्रः कृतयो विद्यन्ते। ता यथा - १. माल्तीमाधवम् (प्रकरणम्)। २. महावीरचरितम् (नाटकम्)। ३. उत्तररामचरितम् (नाटकम्)।

सप्ताङ्कसमन्वितमिदम् उत्तररामचरितं कवेरन्तिमं नाटकमस्ति। अत्र अङ्गीरसः करुणरसो वर्तते। नाटकेऽस्मिन् श्रीरामचन्द्रस्य राज्याभिषेकात् परः कथानकः वर्णितोऽस्ति। नाटकस्यास्य वैशिष्ट्यत्रयं विद्यते। तद्यथा - चित्रवीथिदर्शनम् (प्रथमाङ्के), छायाङ्कः (तृतीयाङ्के), गर्भाङ्कश्च (सप्तमाङ्के)। भवभूतेः पूर्वजाः तैत्तिरीयशाखाध्यायिनः काश्यपगोत्रीया ब्राह्मणा आसन्। जननी जतुकरणी, पिता च नीलकण्ठः आसीत्। स्वपाण्डित्यविषये भवभूतिः स्वयमेवोल्लिखितवान् यद् - "यं ब्राह्मणमियं देवी वाग्वश्येवानुवर्तते" इति। प्रस्तुतोऽयं पाठः उत्तररामचरितस्य "छायाङ्क" इति नाम्नः तृतीयाङ्कादुद्धृतोऽस्ति।

**प्रस्तुतपाठस्य सारांशः -**

सीतात्यागात् परं रामः शम्बूकवधाय दण्डकारण्यं व्रजति, यत्र स्वप्रियां सीतां स्मरन् विलापं करोति। सीताऽपि स्वपुत्रयोः कुशलवयोः वर्षग्रन्थौ वाल्मीक्याश्रमं याति। दण्डकारण्ये रामञ्च पश्यति। गङ्गायाः प्रसादेन अदृश्या सीता रामाय स्वशीतलस्पर्शेन नवजीवनं देदीयते। श्रीरामस्य करुणविलापं श्रुत्वा सा स्वाकारणपरित्यागस्य दुःखं विस्मृत्य श्रीरामे स्निह्यति। राजधर्मपरिपालनाय त्यागात् परो रामविषयको विलापो रामस्य पत्नीव्रतं, सीतां प्रति प्रेमञ्च अभिव्यनक्ति। अत्र भवभूतेः करुणरसः पुनः पुनो दीप्तः।

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥**

लोकस्य जनस्य आराधनाय प्रसादनाय स्नेहम् अनुरागं दयां करुणां सौख्य च यदि वा जानकीमपि सीतामपि मुञ्चतः त्यजतः मम व्यथा दुःखं नास्ति इत्यर्थः।

**अभ्यासप्रश्नाः**

1. भवभूतेः कति कृतयः विद्यन्ते ? के च ते ?

2. रामचन्द्रेण उच्चरितानि सीतायाः सम्बोधननामानि लिखत ।

3. रामाय सीतायाः स्पर्शः कीदृशः आसीत् ?

4. प्रस्तुतपाठस्य सारांशः संस्कृतभाषया लिखत ।

5. पदवाक्यप्रमाणज्ञः कः ?

# षष्ठः पाठः

## राष्ट्राभिवर्धनसूक्तम्

प्रस्तुतोऽयं पाठ्यांशः अथर्ववेदस्य प्रथमकाण्डस्य एकोनत्रिंशत्तमसूक्तादुद्धृतोऽस्ति। अस्मिन् पाठ्यांशे अस्माकं राष्ट्रस्य अभिवृद्धये अनेकेषु मन्त्रेषु विशदं वर्णनम् अवाप्यते। वैदिकलौकिकवाङ्मयेषु अथर्ववेदः अनुपमं स्थानं भजते। अथर्ववेदः भौतिकविषयाणां विविधचिकित्सायाश्च वेदोऽस्ति। अपि चात्र राष्ट्रिया भावनापि परिदृश्यते। सूक्तेऽस्मिन् षण्मन्त्राः विद्यन्ते। सूक्तस्यास्य वसिष्ठः ऋषिः, ब्रह्मणस्पतिः अभिवर्तमणिः वा देवता, अनुष्टुप् छन्दः। तत्र प्रत्येकं मन्त्राः राष्ट्राभिवर्धनाय अस्मान् प्रेरयन्ति, शासति च। राष्ट्रं शत्रुभयरहितम् अभिवृद्धं भवतु।

**संहितापाठः**

**अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।**
**तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय॥ १॥**

**अन्वयः -** येन अभीवर्तेन मणिना इन्द्रः अभिवावृधे तेन ब्रह्मणस्पते अस्मान् राष्ट्राय अभिवर्धय।

**भावार्थः -** हे ब्रह्मणस्पते ! येन अस्माकं पूर्वजाः महर्षयः राजर्षयश्च प्रभूतं धनं प्राप्य महातेजस्विनो बभूवुः। तथैव तस्य सर्वशक्तिमतो जगदीश्वरस्य अनन्तं सामर्थ्यम् उपकारञ्च विचार्य वयं परिपूर्णपुरुषार्थेन सह विद्याधनस्य स्वर्णादिधनस्य च प्राप्त्या सर्वतोभावेन राष्ट्रं पालयेम वर्धयेम च।

**अभिवृत्य सपत्नानभि या नो अरातयः।**
**अभि पृतन्यन्तं तिष्ठाभि यो नो दुरस्यति॥ २॥**

**अन्वयः -** अभिवृत्य सपत्नान् अभि याः नः अरातयः अभि प्रतन्यतं यः नः दुरस्यति, अभि तिष्ठ।

**भावार्थः -** अस्मिन् ऋचि राष्ट्ररक्षार्थं शत्रोः पराजयः विधेयः। विपक्षिणः, अदातृन्, युयुत्सून्, दुराचारिणश्च परितः अभिवृत्य तान् पराजयेत।

**अभि त्वा देवः सविताभि षोमो अवीवृधत्।**
**अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि॥ ३॥**

**अन्वयः -** देवः सविता, सोमः त्वा अभि अवीवृधत् विश्वा भूतानि त्वा अभि यथा अभीवर्तः अससि।

**भावार्थः -** सूक्ष्मातिसूक्ष्मस्य स्थूलातिस्थूलस्य च पदार्थयोः रचनोपकाराभ्यां तस्य परमेश्वरस्य महिमा दरीदृश्यते। तेनैव परमात्मना प्रदत्तेन बलेन शूरवीरपुरुषाः रणभूमौ राक्षसान् विजित्य शान्तिं वितन्वन्ति ।

**अभीवर्तो अभिभवः सपत्नक्षयणो मणिः।**

**राष्ट्राय मह्यं बध्यतां सपत्नेभ्यः पराभुवे॥४॥**

**अन्वयः -** अभीवर्तः अभिभवः सपत्नक्षयणः मणिः मह्यं राष्ट्राय सपत्ने पराभुवे बध्यताम्।

**भावार्थः -** राजलक्ष्म्याः प्रभावविजयार्थं नृपो मणिरत्नादीन् धारयित्वा स्वस्य प्रभूत्वं अभिवर्ध्य शत्रून् पराभूय नितरां राष्ट्राभिवर्धनं विदधीत।

**उदसौ सूर्यो अगादुदिदं मामकं वचः।**

**यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा॥५॥**

**अन्वयः-** असौ सूर्यः उत् अगात् इदं मामकं वचः यथा अहं शत्रुहाः सपत्नहा असपत्नः असानि।

**भावार्थः -** अधिपः राजसिंहासनमधिष्ठाय राजोद्घोषणं विदध्यात् यथा धरणीं सूर्यः प्रकाशयति तथैव राजोद्घोषणमिदं प्रकाशयति यत् अस्माकं राष्ट्रे उपद्रवम् अराजकतां च न प्रसारयेत्।

**सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः।**

**यथाहमेषां वीराणां विराजानि जनस्य च॥६॥**

**अन्वयः -** यथा सपत्नक्षयणः वृषा विषासहिः अहम् अभिराष्ट्रः एषां वीराणां च जनस्य विराजानि।

**भावार्थः -** शत्रूणां नाशकः प्रजानां परिपोषकः स्वसामर्थ्येन सिंहासनं समारुह्य शूरवीरान् विदुषश्च सत्कारपूर्वमहं विराजानि।

**अभ्यासप्रश्ना:**

1. राष्ट्राभिवर्धनसूक्तस्य क: ऋषि: का देवता तथा च सूक्तेऽस्मिन् कति मन्त्रा: सन्ति ?
2. राष्ट्ररक्षार्थं क: विधेय: ?
3. निम्नलिखितानां मन्त्राणां पूर्तिपूर्वक तात्पर्यं स्पष्टयत –

1) अभीवर्तेन मणिना.............

2) अभीवर्तो अभिभव:............

3) उदसौ सूर्यो.............

4) सपत्नक्षयणो वृषा...........

# सप्तमः पाठः

## महामदो यवनो भारतम् अलुलुण्ठत्

निखिलसंस्कृतवाङ्मये छन्दोमयात् पद्यात्परं गद्यकाव्यस्य समुद्भवः। प्रथमं गद्यं कृष्णयजुर्वेदस्य तैत्तिरीयशाखायां लभ्यते। यथा- हेमपरीक्षणस्थानं भवति निकषं तथैव कविपरीक्षणस्थानं भवति गद्यकाव्यम्। निकषे कषिता सुवर्णस्य रेखैव सुवर्णस्य शुद्धतां स्फुटयति तथैव गद्यस्यैका पङ्क्तिरेव कवेः रससिद्धान्तं वाक्पटुतां चिन्तनशैलीं च चारु प्रकाशयति। अतः प्रसिद्धेयमुक्तिः - "गद्यं कवीनां निकषं वदन्ति" इति। पद्यकाव्यस्य तु आदौ छन्दसि आलोकपातो भवति। किन्तु गद्यकाव्ये प्रथमालोकपातः पदसन्निवेशे जायते।

बाणभट्टादारभ्य गद्यकाव्यस्य परम्परायां वर्तमानेषु कविषु अम्बिकादत्तव्यासः प्रसिद्धं स्थानं भजते। अयं जयपुरवास्तव्यः कविः व्यासस्य द्वितीयावतारः इति लोकश्रुतिः। घटिकाशतकः, शतावधानी, सुकविः, आधुनिकबाणः इत्यादिभिः उपाधिभिः विभूषितोऽभूद् अयं कविः। तद्विरचितेषु ग्रन्थेषु शिवराजविजयः इति ऐतिहासिकं गद्यकाव्यं महत्स्थानं धारयति। महाराष्ट्राधिपं शिवराजम् अवलम्ब्य काव्यमिदं विरचितम्। ऐतिहासिकवृत्तान्ताधारेण अस्य काव्यस्य संग्रन्थनादियम् आख्यायिका इति निगद्यते। अत्र त्रयो विरामाः, द्वादश निःश्वासाश्च वर्तन्ते। वीररसप्रधानं काव्यमिदम्। इह नायकोऽस्ति शिवाजिमहाराजः। प्रस्तुतोऽयं पाठ्यांशः शिवराजविजयाख्यस्य गद्यकाव्यस्य प्रथमविरामस्य प्रथमनिःश्वासाद् सङ्गृहीतोऽस्ति।

अधर्मस्य मूलविग्रहा महामदा यवनाः यदा अस्माकं भारतदेशम् आक्रम्य अस्मदीयां परम्परां नीतिं संस्कृतिञ्च व्यनाशयन् तथा श्रुतिस्मृत्यादिग्रन्थान् प्राज्वलयन् मन्दिराणि च अलुण्ठयन् तदा महाराष्ट्रप्रदेशे सनातनधर्मस्य रक्षणार्थं "कार्यं वा साधयेयम्, देहं वा पातयेयम्" इति उद्घोषयन् अग्रेसरोऽभूत् शिवराजनामा वीरः। शिवराजस्य जननी जीजाबाई जनकश्च शाहजी भोसले आसीत्।

योगिराजो ब्रह्मचारिमुखाद् यवनदुराचारं श्रृणोति इति, तत्रादौ कालकलापमहामदस्य भारताक्रमणम्, महामदस्य सोमतीर्थध्वंसः, सनातनराज्यध्वंसः, यवनराज्यारम्भः, महाराष्ट्रप्रदेशे सनातनधर्मरक्षकः मुगलशासनसमुत्पाटनपटुः शिवराजः इत्येते विषयाः क्रमशः अस्मिन् पाठे विवृताः।

### अभ्यासप्रश्नाः

1. जयपुरवास्तव्य: अम्बिकादत्तव्यासस्य गद्यकाव्यं किम् ?

2. शिवराज: कीदृशीं प्रतिज्ञामकरोत् ?

3. सोमनाथ-मन्दिर-लुण्ठन-वृत्तान्तं स्ववचोभिः स्पष्टयत ।

4. महामदस्य यवनस्य भारताक्रमणं तथा दुष्कर्म स्वांगस विवृणुत ।

5. ''अयं पाठः अस्मान् किं शिक्षयति'' इति संस्कृतभाषया प्रकटयत ।

# अष्टमः पाठः

## भावैक्यसन्देशः

**विस्मृतभेदाः सन्तो, निर्मलभावापन्नाः।**
**एकीभावं हृदयारूढं सततं कुर्वन्तु**
**भोः भोः सततं कुर्वन्तु ॥ विस्मृत... ॥१॥**

**भावार्थः -** जनाः परस्परभेदभावं विस्मरेयुः। प्रत्येकं मनुष्याणां मनसि निर्मलभाव आस्ताम्। सर्वेषां हृदि समानो भावोऽस्तु।

**पूर्वजमुनिजनकविजनवाञ्छा सर्वेषामैक्यं**
**सुखिनस्सर्वे सन्त्विति गानं तेषां बहुहृद्यम्।**
**भाषाधनमतजातिविभेदो हृदये मा भवतु**
**दुःखितदीनजनानुन्नेतुं हस्ताः प्रसरन्तु**
**भोः भोः हस्ताः प्रसरन्तु ॥ विस्मृत... ॥२॥**

**भावार्थः -** पूर्वजानां मुनीनां कवीनाञ्च अभिलाष एक एव यत् सर्वे सुखिनस्सन्तु। केषामपि मनसि जातिभेदः, मतभेदः, भाषाभेदः, धनिकनिर्धनभेदश्च मा भवेत्। अपि च दुःखितानां दीनानां चोपकारार्थं हस्तं प्रसार्य अग्रेसरा भवन्तु।

**गङ्गातुङ्गाकावेरीजलमस्माकं मत्वा**
**कृतसङ्कल्पाः कार्यं कर्तुम् आलस्यं हित्वा।**
**सुवर्णपुष्पां पृथिवीमेतां क्रष्टुम् आयान्तु**
**प्रवहतु कामं स्वेदस्रोतः धैर्यं मा जहतु**
**भोः भोः धैर्यं मा जहतु॥ विस्मृत.....॥३॥**

**भावार्थः -** गङ्गा, तुङ्गा, कावेरी इत्यादीनां नदीनां पूतं जलमस्माकमेव मत्वा आलस्यं त्यक्त्वा कृतसङ्कल्पाः सन्तः कार्यमग्ना भवन्तु। स्वर्णकुसुमसदृशीं भूमिं कर्षयितुम् आगच्छन्तु। अधिकस्वेदे सत्यपि धैर्यं न त्यक्तव्यम्।

**घर्षणलुण्ठनवञ्चनहननं प्रलयं संयातु**
**स्नेहस्रोतः प्रवहतु भ्रातुर्भावो हृदि लसतु।**

**अनिलः सलिलम् अनलः सर्वं सर्वेषामेकम्**
**प्रवहति रक्तमभक्तं मातुः भेदो मा भवतु**
**भो: भोः भेदो मा भवतु॥ विस्मृत... ॥४॥**

**भावार्थः -** घर्षणम्, लुण्ठनम्, वञ्चनम्, हननञ्च सर्वथा प्रलयं प्राप्नोतु। स्नेहभावना, सहोदरभावना च अस्माकं हृदि प्रसारिता भवतु। वायुजलाग्नयः सर्वेषां कृते समाना भवन्तु। समेषां वपुष्षु मातुः रक्तमेव प्रवहति। अतः भेदभावो मा भवतु।

**अभ्यासप्रश्ना:**

1. विद्वान् जि महाबलेश्वर भट्टस्य परिचयो देय: ।
2. पाठ्यांशस्य सारं संस्कृतभाषया लिखत ।
3. सर्वेषां वापुष्षु किं प्रवहति ?
4. अधिकस्वेदेऽपि किं न वक्तव्यम् ?

# नवमः पाठः

## लकारार्थः

अष्टाध्याय्यास्तृतीयेऽध्याये धातुभ्यो विहिता दश लकारप्रत्ययाः विद्यन्ते। ते च यथा - लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्, इति। लट् लिट् लुट् लृट् लेट् लोट् इति षड् लकाराणाम् अन्ते टकारस्य इत्त्वात् एते टित्-लकाराः कथ्यन्ते। लङ् लिङ् लुङ लृङ् इति चतुर्णां लकाराणाम् अन्ते ङकारस्य इत्त्वाद् एते ङित्-लकाराश्च कथ्यन्ते। इत्थं टिल्लकाराः षट्, ङिल्लकाराश्चत्वारः, आहत्य दश लकारा भवन्ति। एतेषु पञ्चमो लेट्-लकारः वेदे एव प्रयुज्यते। अतः नव लकारा एव शिष्यन्ते। तत्र पुनः विधिलिङ्-आशीर्लिङ्-भेदाभ्यां लिङ्-लकारो द्विविधः। तथा च लोके अपि दश लकाराः। कस्मिन्नर्थे इमे लकारा भवन्तीति जानीमः। लकारो द्विविधः। स च- सार्वधातुकः, आर्धधातुकश्च।

**सार्वधातुकलकाराः**

**वर्तमाने लट्** *(पा.सू. ३.२.१२३)*

वर्तमानार्थे स्थिताद्धातोः लट् भवति। प्रारब्धोऽपरिसमाप्तश्च कालो वर्तमानः। तस्मिन् वर्तमानार्थे वर्तमानाद् धातोर्लट् प्रत्ययो भवति। देवदत्तः पठति। पचति। भवति।

**अनद्यतने लङ्** *(पा.सू. ३.२.१११)*

न विद्यते अद्यतनं यस्मिन्, तद् अनद्यतनम्। अनद्यतनभूतार्थवृत्तेः धातोः लङ् स्यात्। अर्थात् अविद्यमानाद्यतने भूतेऽर्थे वर्तमानाद् धातोर्लङ् प्रत्ययो भवति। ह्यः देवदत्तः अकरोत्। अहरत्। अभवत्।

**विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्** *(पा.सू. ३.३.१६१)* -

विधिनिमन्त्रणामन्त्रणाधीष्टसम्पश्नप्रार्थनेषु धातोः लिङ् स्यात्। अर्थात् विधिः, निमन्त्रणम्, आमन्त्रणम्, अधीष्टः, संप्रश्नः, प्रार्थनम्, इत्येतेष्वर्थेषु धातोर्लिङ् प्रत्ययो भवति।

**विधिः** - विधि इत्युक्ते प्रेरणम् इति। उदा- कटं कुर्यात् । वस्त्रं क्षालयेः ।

**निमन्त्रणम्** - नियोगकरणम् इति। उदा- इह श्राद्धे भवान् भुञ्जीत। इह भवानासीत।

**आमन्त्रणम्** - कामाचारकरणम् इति। उदा- इह भवान् भुञ्जीत। अत्र कामाचारानुज्ञा वर्तते।

**अधीष्टः** - सत्कारपूर्वको व्यापारोऽधीष्टः। उदा- भवान् माणवकम् अध्यापयेद्। माणवकं भवानुपनयेत।

**संप्रश्नः** - सम्प्रधारणं संप्रश्नः इति। उदा - किं नु खलु भो व्याकरणमधीयीय ?

**प्रार्थनम्** - प्रार्थनं याचना इति। उदा - मां व्याकरणम् अध्यापयेत्। भवान् मे अन्नं दद्यात्।

**लोट् च** *(पा.सू. ३.३.१६२)* -

विध्याद्यर्थेषु आशिषि च धातोः लोट् स्यात्। उदाहरणम् - भवतो मङ्गलम् आस्ताम्। त्वम् आयुष्मान् एधि।

## आर्धधातुकलकारः

**परोक्षे लिट्** *(पा.सू. ३.२.११५)* -

भूतानद्यतनपरोक्षार्थवृत्तेः धातोः लिट् स्यात्। उदाहरणम् - रामो बभूव। चकार। जहार। प्रयोक्तुः इन्द्रियागोचरत्वं परोक्षत्वम् इत्येव सर्वसम्मतम्।

**छन्दसि लिट्** *(पा.सू. ३.२.१०५)* -

छन्दसि विषये धातोर्लिट् स्यात्। उदाहरणम्- अहं सूर्यमुभयतो ददर्श। अहं द्यावापृथिवी आततान।

**अनद्यतने लुट्** *(पा.सू. ३.३.१५)* -

भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् स्यात्। उदाहरणम् - देवदत्तः श्वः कर्ता। अहं श्वः गन्तास्मि।

**लृट् शेषे च** *(पा.सू. ३.३.१३)* - भविष्यदर्थाद्धातोर्लृट् स्यात् क्रियार्थायां क्रियायामसत्यां सत्यां च। अर्थात् शुद्धे भविष्यति काले, चकारात् क्रियार्थायां क्रियायां चोपपदे धातोः लृट् भवति। उदाहरणम् - अद्य श्वो वा भविष्यति। अहं अद्य सायं श्वः परश्व प्रपरश्वो वा गमिष्यामि।

**आशिषि लिङ्लोटौ** *(पा.सू. ३.३.१७३)* -

आशंसनमाशीः। अप्राप्तस्येष्टस्यार्थस्य प्राप्तुमिच्छा। आशीर्विशिष्टेऽर्थे वर्तमानाद् धातोर्लिङ्लोटौ प्रत्ययौ भवतः। उदाहरणम् - चिरं जीव्याद् भवान्। आयुष्यं भूयात्। लोडपि - चिरं जीवतु भवान्।

**लुङ्** *(पा.सू. ३.२.११०)* -

भूतार्थवृत्तेः धातोः लुङ् स्यात्। उदाहरणम् - देवदत्तः अभूत्। अहम् अध्ययनम् अकार्षम्।

**लिङ्निमित्ते लृङ् क्रियातिपत्तौ** *(पा.सू. ३.३.१३९)* -

हेतुहेतमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम्। अर्थात् लिङ्निमित्ते भविष्यति काले लृङ् प्रत्ययो भवति क्रियातिपत्तौ सत्याम्। उदाहरणम् - सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्। यज्ञोऽभविष्यच्चेत् सुवृष्टिरभविष्यत्। भवान् घृतेन अभोक्ष्यत् यदि मत्समीपमासिष्यत। यदि त्वम् आदर्शविद्यालये अपठिष्यः तर्हि वेदम् अवेदिष्यः।

**भूते च** *(पा.सू. ३.३.१४०)* -

भूते च काले लिङ्निमित्ते क्रियातिपत्तौ सत्यां लृङ् प्रत्ययो भवति। उदाहरणम् - दृष्टो मया भवत्पुत्रोऽन्नार्थी चङ्क्रम्यमाणः, अपरश्च द्विजो ब्राह्मणार्थी। यदि स तेन दृष्टोऽभविष्यत्, तदा अभिक्ष्यत। न तु भुक्तवान्, अन्येन पथा स गतः।

**अभ्यासप्रश्नाः**

1. कति लकाराः भवन्ति ? तेषां नामानि लिखत ।
2. लट्, लृट्, लङ्, लिङ्, लुट् लकाराणां प्रमुखसूत्राणि लिखित्वा सोदाहरणं स्पष्टयत ।
3. टित् लकाराः के ?
4. प्रारब्धोऽपरिसमाप्तश्च इति कस्य लकारस्य लक्षणम् ?

# दशमः पाठः

## प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्

संसारेऽस्मिन् मुख्यतया आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकञ्चेति त्रिविधं दुःखं वरीवर्ति। तत्र प्रथमम् **आध्यात्मिकं दुःखम्-** आध्यात्मिकं दुःखं द्विविधम्- शारीरम्, मानसञ्चेति। **शारीरम्-** वातपित्तकफज्वरादिविपर्ययजनितं दुःखम्। **मानसम्-** कामक्रोधलोभमोहेर्ष्याभयादिजनितं दुःखम्। **आधिभौतिकं दुःखम्-** चतुर्विधभूतसमूहनिमित्तं जरायुजाण्डजस्वेदजोद्भिज्जेभ्यः सकाशादुपजायते। **आधिदैविकं दुःखम्-** देवानामिदं दैवम्, दिवः प्रभवतीति वा दैवम्, तदधिकृत्य यदुपजायते शीतोष्णवातवर्षाऽशनिपातादिहेतुकं दुःखम्। उपर्युक्तम् आध्यात्मिकं दुःखमेव आयुर्वेदचरकसंहितायां "प्रज्ञापराधः" इत्युक्तम्। विश्वस्मिन् अशान्तेः मूलाधारस्तु मानवदुष्प्रवृत्तिरेव विद्यते। अतः मानवानां दुष्प्रवृत्तेः निवारणाय प्रस्तुतोऽयं पाठ्यांशः चरकसंहितायाः विमानस्थानस्य जनपदोध्वंसनीयविमानाध्यायाद्, तथा शारीरस्थानतः सङ्गृहीतो विद्यते।

धीधृतिस्मृतिविभ्रंशः सम्प्राप्तिः कालकर्मणाम्।
आसात्म्यार्थागमश्चेति ज्ञातव्या दुःखहेतवः॥ १.९८॥

धीधृतिस्मृतिविभ्रष्टः कर्म यत् कुरुतेऽशुभम्।
प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपनम्॥ १.१०२॥

उदीरणं गतिमतामुदीर्णानां च निग्रहः।
सेवनं साहसानां च नारीणां चातिसेवनम्॥ १.१०३॥

कर्मकालातिपातश्च मिथ्यारम्भश्च कर्मणाम्।
विनयाचारलोपश्च पूज्यानां चाभिधर्षणम्॥ १.१०४॥

ज्ञातानां स्वयमर्थानामहितानां निषेवणम्।
परमौन्मादिकानां च प्रत्ययानां निषेवणम्॥ १.१०५॥

अकालादेशसञ्चारो मैत्री सङ्क्लिष्टकर्मभिः।
इन्द्रियोपक्रमोक्तस्य सद्वृत्तस्य च वर्जनम्॥ १.१०६॥

ईर्ष्यामानभयक्रोधलोभमोहमदभ्रमाः।
तज्जं वा कर्म यत् क्लिष्टं क्लिष्टं यद्देहकर्म च॥ १.१०७॥

यच्चान्यदीदृशं कर्म रजोमोहसमुत्थितम्।
प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्॥ १.१०८॥

## पाठसारांशः

अत्यधिकलोभः, मिथ्याभाषणम्, नास्तिकता, वेदविहितकर्मणामनादरः, मानवोचितगुण-कर्तव्यानाम् अपरिपालनम् इत्यादिभिः क्रियाकलापैः प्रकृतिः अव्यवस्थिता भवति। प्रकृतेः अपचारं दूरीकर्तुं काश्चन अदृश्यशक्तिः कार्यं साधयतीति जनानां विश्वासो विद्यते। प्रकृतिवैपरित्याद् अदृश्यशक्तेः प्राकृतप्रचण्डोत्पात उद्भवति, स एव संसारस्थानां जनानां विनाशाय उग्ररूपेण समुपस्थितो भवति। तथाभूतशक्तिः मानवान् बोधयितुं प्रयतते यत् प्रतिकुलाचारेण मानवप्रकृत्योः प्रक्रिया दूषिता भवति। तेन सृष्टेः उपप्लवः विनाशो वा भवति। लोभाधिक्याद् एकः जनः अन्यस्य जनस्य, एकं राष्ट्रम् अपरराष्ट्रस्य प्रयोजनहनने संलग्नं भवति। फलतः उभयोः जनयोः राष्ट्रयोः च मध्ये मध्ये शान्तेः ह्रासो भवति।

तथा च जीवनमेव सङ्घर्षमयं भवति सर्वदा। नैतिकतारहितं कार्यं सम्यक् समाजं राष्ट्रं च स्थापयितुं न शक्नोति। नीत्युल्लङ्घनव्यवहारेण वेदादिग्रन्थेषु अश्रद्धा जायते। तेन तत्रस्थानां सद्गुणानां समुचितनीतिनियमानाञ्च ज्ञानाय जिज्ञासा एव न भवति, कुतो वा पालनम्? ईश्वरस्य प्रकृतेर्वा प्रदत्तनियमे निष्ठाभावान्मानवानां समस्तप्रजातीनां वा परस्परं स्नेहपूर्णस्य सौहार्दमयस्य व्यवहारस्य समाप्तिर्भवति। मिथः सौहार्दमयो व्यवहारस्तु ईश्वरस्य वेदादिशास्त्राणां वा आज्ञापालनादेव सम्भवति। उक्तञ्च श्रीमद्भगवद्गीतायाम्-

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥**

### अभ्यासप्रश्नाः

1. दु:खं कति विधं ? के च ते ?
2. वातपित्तकफज्वरादिविपर्ययजनितं दु:खं किम् ?
3. आधिभौतिकं दु:खं किम् ?
4. असत्कर्मपूर्वकृतयो: योनि: क: ?

# एकादशः पाठः

# सुभाषितानि

अमृतवचनम्, सूक्तिः, सुभाषितम्, इत्यादयः पर्यायशब्दाः नीतिश्लोकस्यैव सन्ति। तच्छ्लोकः नीतिश्लोक इत्युच्यते, यच्छ्रुत्वा मनसि सन्तोषो जायते तथा च कर्तव्याकर्तव्यविषयान् ज्ञात्वा सुष्ठु जीवनं यापयितुं शक्यते। नीतिश्लोकाः इतरजनानां मनः क्लेशाय, अपरेषाम् अनादराय च न भवति। अपि तु सर्वेषां हिताय भवति। नीतिश्लोकेषु बुद्धिमत्ता-नैतिकता-विवेकशीलता-आध्यात्मिकतादयो गुणा भवन्ति। अतः अस्मिन् पाठे छात्राणां ज्ञानाय, सद्गुणानाम् अर्जनाय च केचननीतिश्लोकाः विविधविषयसम्बद्धाः अत्रः समुपस्थापिताः।

**हिताशी स्यान्मिताशी स्यात्कालभोजी जितेन्द्रियः।**
**पश्यन् रोगान् बहून् कष्टान् बुद्धिमान् विषमाशनात्॥**

**भावार्थः -** यो धीमान् सः अपथ्यभोजनाद् उत्पद्यमानान् रोगान्, तेभ्यः जायमानानि बहूनि कष्टानि च पश्यन् हितं भोजनं कुर्यात्। मितं भोजनं कुर्यात्। काले भोजनं कुर्यात्। तथा स जितेन्द्रियो भवेत्।

**अत्यम्बुपानाद् विषमाशनाच्च दिवा च सुप्तेः निशि जागराच्च।**
**संरोधनान्मूत्रपुरीषयोश्च षड्भिः निदानैः प्रभवन्ति रोगाः॥**

**भावार्थः -** अधिकजलस्य पानात्, अधिक-अपथ्यकरभोजनात्, दिने शयनात्, रात्रौ जागरणात्, मूत्रस्य, मलस्य च प्रतिरोधाद् एवं षड्भिः मूलकारणैः रोगाः सम्भवन्ति ।

**आहारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसन्धारणार्थम्।**
**प्राणाः सन्धार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखम्॥**

**भावार्थः -** आहारार्थं निन्दितं कर्म न कुर्यात्। केवलं प्राणधारणार्थम् आहारं स्वीकुर्यात्। परमतत्त्वस्य जिज्ञासार्थं प्राणानां धारणम्। दुःखस्य निवृत्तये तत्त्वस्य जिज्ञासा कर्तव्या।

**स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणाम्।**
**तस्मात् स्नानं निषेवेत श्रीपुष्टारोग्यवर्धनम्॥**

**भावार्थः -** श्रुतिस्मृत्यादिभिः मानवानां सर्वाः क्रियाः स्नानपूर्वकतया विहिताः। अतः श्रीपुष्टि-आरोग्यवर्धनार्थं स्नानम् अवश्यं करणीयम्।

**प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्।**

**अयुक्ताभ्यासयोगेन सर्वरोगस्य सम्भवः॥**

**भावार्थः -** विध्युक्तप्राणायामस्य अभ्यासेन सर्वे रोगाः क्षीणाः भवन्ति। अविध्युक्तप्राणायामस्य अभ्यासेन सर्वे रोगाः सम्भवन्ति।

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**

**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः॥**

**भावार्थः -** कार्यमचिन्तयित्वैव सहसा न कुर्वीत। कथञ्चिद् विवेकराहित्यम् आपदायाः परमापदं विद्यते। विवेकपुरस्सरं कार्यं कर्तुं जनं गुणलुब्धो वैभवः स्वयमेव वृणुते।

**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति।**

**दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः॥**

उद्योगिनं पुरुषसिंहं लक्ष्मीः उपैति = कार्यतत्परं सिंहवत् साहसिनं पुरुषं प्रति सम्पत् स्वयम् आगच्छति। दैवेन देयम् = देवः अनुगृह्णाति, इति कापुरुषाः = कुजनाः, वदन्ति, अतः दैवं निहत्य = अदृष्टे विश्वासं परित्यज्य आत्मशक्त्या, पौरुषं कुरु = पुरुषप्रयत्नं कुरु। यत्ने कृते, यदि न सिद्ध्यति = इष्टकार्यस्य सिद्धिः न भवति चेद् अत्र कः दोषः।

**अभ्यासप्रश्नाः**

1. सुभाषितकारः चातकं संबोध्य किं वदति ? तस्य सन्देशः कः ?
2. आदित्यस्य नमस्कारात् किं भवति ?
3. निन्दितं कर्म कदा न कुर्यात् ?
4. रिक्तस्थानानि पूरयित्वा भावार्थं लिखत –

    1) आहारार्थं कर्म................न दुःखम् ।

    2) सहसा विदधीत.................स्वयमेव सम्पदः ।

    3) उद्योगिनं पुरुष...............सिद्ध्यति कोऽत्र दोषः ।

# द्वादशः पाठः

## सर्वज्ञानमयी संस्कृतभाषा

मनुष्यस्य कृते सम्यक् व्यवहारनिर्वाहाय भाषायाः अपरिहार्या आवश्यकता विद्यते। अत एव नानाजनानां व्यवहाराय विश्वस्मिन् विश्वे नैका भाषा जनिमलभन्त। तासु सर्वासु भाषासु प्राचीनतमा भाषितभाषा देवभाषा संस्कृतभाषाऽस्ति। विश्वस्य शाश्वतिकः प्राचीनतमश्च वाङ्मयविशेषो वेदः। वेदस्तु ऋषिभिः दृष्टो वाङ्मयविशेषः। वेदस्य संस्कृतभाषामयत्वात् सर्वास्वपि भाषासु प्राचीनतमा संस्कृतभाषा एव। संस्कृतभाषा बह्वीनां ज्ञानविज्ञानयोर्विश्वभाषाणां साक्षात् परम्परया वा जननी, शब्दजालस्य च स्रष्ट्री। अतः संस्कृतभाषा विश्ववाङ्मये अद्वितीयं स्थानं विभूषयति।

अस्याः भाषायाः वैशिष्ट्यमस्ति यद् मानवमुखाद् यावतां ध्वनीनाम् उच्चारणं कर्तुं शक्यं तावन्तो ध्वनयः तैस्तैरक्षरसङ्केतैः उच्चारणस्थानेषु तथा उच्चार्यन्ते। यल्लिख्यते तदेवोच्चार्यते, लिखितस्य सङ्केतस्य उच्चारणकाले लोपः कर्तुं न हि शक्यः। अस्यां भाषायाम् उच्चारणस्थानस्य विशिष्टं वैज्ञानिकत्वं दृश्यते। स्वरव्यञ्जनादिवर्णानां व्यवस्था यावती अत्र दृश्यते अन्यासु भाषासु सा तथा नास्ति। अर्थगौरवाय सूत्ररूपेण प्रकटनमस्याः भाषायाः वैशिष्ट्यम्।

संस्कृतभाषा, भारती, सुरभारती, अमरवाणी, गीर्वाणगीः, देववाणी, देवभाषा, संस्कृतवाक्, अमृतवाणी इत्यादिभिः नामभिः सुप्रसिद्धा इयं भाषा। एषा भाषा भारतमभिव्याप्य प्राचीनकालादेव सर्वव्यवहारेषु उपयुक्ता, वियटनामपर्यन्तेषु विविध-देशेषु सामाजिकेषु, धार्मिकेषु च कार्येषु सश्रद्धं व्यवहारपथं नीता च। संस्कृतभाषा एषा नानाविधज्ञानानां विज्ञानानां च शेवधिः आकरस्वरूपा विराजते। तथा च -

**वेदाः** - ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेद-नामानः चत्वारो वेदाः प्रथन्ते। वेदः विश्वस्य सर्वाद्यः वाङ्मयविशेषः, ज्ञानराशिः, चिन्तनानां स्रोतः च विलसति। वेदे सर्वासां प्रजानां परस्परं सौहार्दस्य, कल्याणमार्गस्य, आरोग्यस्य, राष्ट्रसंरक्षणस्य, राष्ट्रसंवर्धनस्य, विश्वशान्तेः च उपायाः मानवानां हिताय वेदेषु ऋषिभिः दृष्टा चिरात् सर्वान् मानवान् प्रबोधयन्ति।

**उपवेदाः** - आयुर्वेदः ऋग्वेदस्य, धनुर्वेदः यजुर्वेदस्य, गान्धर्ववेदः सामवेदस्य, स्थापत्यवेदः अथर्ववेदस्य च उपवेदा विद्यन्ते। इमे उपवेदाः बीजरूपेण वेदेषु विद्यमानानां ज्ञानानां कालान्तरे आधुनिककालिकानां विविधज्ञानानां प्रेरकम्, उद्बोधकं वा समभवत्।

**वेदाङ्गानि - शिक्षा व्याकरणं छन्दः निरुक्तं ज्यौतिषं तथा।**

कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः॥

इति षड् वेदस्य अङ्गानि सन्ति। शिक्षा नाम शुद्धोच्चारणस्य शास्त्रम्। व्याकरणं साधुशब्दानां व्याख्यानाय प्रवृत्तं शास्त्रम्। गायत्र्युष्णिगनुष्टुभादिच्छन्दसाम् अक्षरनियमेन निदर्शकं छन्दश्शास्त्रं वर्तते। सूत्रशैल्या ग्रथितं आचार्यपिङ्गलकृतं छन्दश्शास्त्रम् ज्ञानस्य संवर्धनाय अद्भुतम् उपकरणम् अस्ति। निरुक्तं वेदशब्दानां निर्वचनम् अर्थं च निर्वक्ति। ज्यौतिषं ज्योतिषां ग्रहनक्षत्रादीनां गणनं तदनुगुणं कालगणनं च निदर्शयति। कल्पश्च वेदानां श्रौतस्मार्तगृह्यकर्मसु धर्मकर्मसु च विनियोगं प्रकल्पयति। इमानि वेदाङ्गानि आधुनिके काले भारतीयां संस्कृतिम्, विद्यां तथा जनमानसं च अभिव्याप्य जनानां व्यवहारं प्रभावयन्ति।

**दर्शनानि** - चार्वाकम्, चतुर्विधं बौद्धं दर्शनम्, जैनं चेति षण्णास्तिकानि दर्शनानि विद्यन्ते। न्यायः, वैशेषिकम्, सांख्यम्, योगः, पूर्वमीमांसा, उत्तरमीमांसा इति षडास्तिकानि दर्शनानि सन्ति। एतेषु आस्तिकेषु दर्शनेषु वेदस्य प्रामाण्यम् अङ्गीक्रियते। इत्थं संस्कृतं न केवलं लौकिकभाषा, अपि तु कायिक-वाचिक-मानसिकस्वास्थ्यस्य उपदेशिकी, आत्मनो बोधिका च भाषा संस्कृतम् अस्ति।

**आयुर्वेदशास्त्रम्** - मनुष्याः सर्वदा आरोग्यवन्तः सुखिनश्च भवेयुः इति चिन्तयन्ति। अत एव चरक-सुश्रुत-वाग्भट्टादयो महर्षयः आयुर्वेदे ग्रन्थान् विरचय्य विश्वस्मै महान्तम् उपकारम् अकुर्वन्। द्रव्यगुणविज्ञानम्, कायचिकित्सा, शल्यचिकित्सा, कुमारभृत्यम्, वाजीकरण्म् इत्यादयः आयुर्वेदविषयाः आधुनिके अपि वैद्यशास्त्रे मूलविषयत्वेन परिगणिताः सन्ति।

**नीतिशास्त्रम्** - विदुरनीतिः, नारदनीतिः, कौटिल्यस्य अर्थशास्त्रम्, कामन्दकीयनीतिः, शुक्रनीतिः, बृहस्पतिनीतिः चेति प्रसिद्धाः नीतिशास्त्रग्रन्थाः संस्कृतवाङ्मये उपलभ्यन्ते। विष्णुशर्मणः पञ्चतन्त्रम्, सोमदेवस्य कथासरित्सागरः, भर्तृहरेः नीतिशतकम् इत्यादयः नीतिशास्त्रग्रन्थाः संस्कृतभाषायां विराजन्ते।

**खगोलशास्त्रम्** - कालगणनाक्षेत्रे भारतीयखगोलशास्त्रं विश्वस्मिन् सुविख्यातं वर्तते। खं नाम आकाशः। गोलस्य तात्पर्यं भवति गोलाकाररूपम्। गोलरूपेण आकाशस्य चिन्तनं खगोलो भवति। आर्यभट्ट-वराहमिहिर-भास्कराचार्य-ब्रह्मगुप्तादीनां ग्रन्थेषु खगोलविज्ञानस्य विषयाः निरूपिता विद्यन्ते।

**भौतिकशास्त्रम्** - पृथिवी-अप्-तेजो-वायु-आकाश-नामकानां पञ्चानां भूतानां चिन्तनं न्यायशास्त्रे वैशेषिकशास्त्रे च समभूत्। ऋग्वेदस्य १०.१२९ नासदीये सूक्ते वैश्विकसृष्टिमधिकृत्य सूक्ष्मम् ऋषिदृष्टं चिन्तनं प्रत्यक्षं भवति। अथर्ववेदस्य पृथिवीसूक्ते भूमेः अन्तर्वर्तिनां खनिजानाम्, महार्घवस्तूनां च विषये चिन्तनं समुपलभ्यते। महर्षिः कणादः परमाणुवादम् उपास्थापयत्। तत्रैव विश्वनिर्माणस्य चिन्तनमपि

द्रष्टुं शक्यते। महर्षेः कपिलस्य साङ्ख्यदर्शने सत्कार्यवादस्य चिन्तनं तथा विश्वनिर्माणस्य चिन्तनमपि प्रत्यक्षं द्रष्टुं शक्यते।

**विज्ञानविषयकं चिन्तनम्** - वायुप्रवाहतः उत्पन्नम् ऊर्जः, सामुद्रम् ऊर्जः, सौरम् ऊर्जं च प्राचीनकाले परिगणितम् अभिज्ञातं च आसन्। भरद्वाजमहर्षेः यन्त्रसर्वस्वम्, अगस्त्यस्य शक्तिसूत्रम्, ईश्वरस्य सौदामिनीकला, भरद्वाजस्यैव अंशुमत्तन्त्रम्, शाकटायनस्य वायुतत्त्वप्रकरणं वैश्वमारुततन्त्रं च, नारदस्य धूमप्रकरणम् इत्यादीनां विज्ञानविषयकाणां ग्रन्थानामुल्लेखाः दृश्यन्ते। भोजस्य समराङ्गणसूत्रधारम्, शौनकमहर्षेः व्योमयानतन्त्रम्, गर्गस्य यन्त्रकल्पः, नारायणस्य विमानचन्द्रिका, वाचस्पतेः यानबिन्दुः इत्यादयः नैके ग्रन्था अपि विज्ञानविषयका एव।

**वास्तुविज्ञानम्** - भारतीयैः मनीषिभिः वास्तुविज्ञानविषये गहनं चिन्तनं विहितमस्ति। अजन्ता-एल्लोरा-कैलासनाथ-प्रम्बणन्-बोरबदूरु-अंकोरवाट्-आलयनिर्माणादिषु भारतीयवास्तुशास्त्रस्य सिद्धान्तानाम् अनुसरणं दृश्यते। इदानीन्तने समयेऽपि आधुनिकाः वास्तुकाराः नानाविधनिर्माणे अनेकान् वास्तुशास्त्रस्य सिद्धान्तान् विज्ञानानुगुणं संयोजयन्ति, जनानां विश्वासं च संवर्धयन्ति।

**इतिहासः पुराणानि च** - महर्षिणा वाल्मीकिना विरचितं रामायणम् आदिकाव्यमिति सर्वैः ज्ञायते। महर्षिणा वेदव्यासेन प्रणीतं महाभारतम् अपरमैतिहासिकं काव्यमिति सुप्रसिद्धम्। अष्टादश पुराणान्यपि वेदव्यासेन महर्षिणा विरचितानि सन्ति। एतेषु अस्माकं देशस्य प्राचीनेतिहासस्य ज्ञानाय बह्वः सामग्र्यः उपलभ्यन्ते।

सर्वाणि इमानि वैज्ञानिकानि चिन्तनानि सर्वादौ संस्कृतभाषया एव ऋषिभिः प्रवर्तितानि, चिन्तितानि ग्रन्थरूपेण संदृब्धानि च तैः। तत् सर्वं ज्ञानं संस्कृतभाषया एव परम्परया अस्मान् प्राप्नोत्। तत् सर्वं ज्ञानम् अद्य वैज्ञानिकानां प्रयोगैः महिम्नः अतिशयं गच्छति। अतः संस्कृतभाषा, या भाषितभाषा, सा सर्वज्ञानमयी विराजते इति वक्तुं शक्यते।

**अभ्यासप्रश्नाः**

1. कति विद्यास्थानानि सन्ति ? के च ते ?
2. उपवेदानां नामानि क्रमशः लिखत ।
3. षडास्तिकदर्शनानां नामानि लिखत ।
4. वेदाङ्गानि कति ? के च ते ?
5. सर्वज्ञानमयी संस्कृतभाषा इत्यधिकृत्य संस्कृतभाषया स्वविचारान् प्रकटयत ।

# त्रयोदशः पाठः

## सहसा विदधीत न क्रियाम्

महाकविः भारविः शैवमतावलम्बी, प्रकाण्डपण्डितः, राजनीतिज्ञः, वीररसवर्णनकुशलः, अलङ्कृतशैल्याः प्रवर्तकः च आसीत्। दण्डिविरचितम् अवन्तिसुन्दरीकथानुसारं कुशिकगोत्रीयः ब्राह्मणः आसीत् भारविः। स आनन्दपुरे निवसति स्म। ततः परं स वरारप्रान्तम् अचलपुरम् (एचिलपुरम्) आगत्य निवासम् अकरोत्। अस्मिन्नेव वंशे नारायणस्वामी जातः। तस्य पुत्र एव दामोदरः आसीत्। अयमेव 'दामोदरः' इति नाम्ना ख्यातः अभवत्।

इत्थं भारविः दण्डिनः प्रपितामहः आसीत्। तस्य स्थितिकालः ६०० ईसवीयसमीपे मन्यते। किरातार्जुनीयं महाकाव्यम् अनेनैव प्रणीतम्। महाभारतमुपजीव्य विरचितमिदं महाकाव्यम्। अस्मिन् अष्टादश सर्गा विद्यन्ते। एतत् बृहत्त्रय्यां प्रथमस्थाने परिगणितम्। संस्कृतविद्वत्समाजे **'भारवेरर्थगौरवम्' नारिकेलफलसम्मितं वचो भारवेः, स्फुटता न पदैरपाकृता, सहसा विदधीत न क्रियाम्** इत्यादिनि आभणकानि सुप्रसिद्धानि एव। प्रस्तुतोऽयं पाठ्यांशः किरातार्जुनीयमहाकाव्यस्य द्वितीयसर्गात् सङ्गृहीतः।

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥**

**अन्वयः -** क्रियां सहसा न विदधीत, अविवेकः आपदां परमं पदं हि विमृश्यकारिणं गुणलुब्धाः सम्पदः स्वयं वृणते।

**भावार्थः -** कार्यमचिन्तयित्वैव सहसा न कुर्वीत, कथञ्चिद् विवेकराहित्यम् आपदायाः परमं पदं विद्यते। विवेकपुरस्सरं कार्यं कर्तुं जनं गुणलुब्धो वैभवः स्वयमेव वृणुते।

**अभिवर्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा।**
**स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति॥**

**अन्वयः -** यः विधिबीजानि विवेकवारिणा अनुपालयन् अभिवर्षति सः फलशालिनीं क्रियां लोकः शरदम् इव अधितिष्ठति।

**भावार्थः -** यः जनः विधिबीजसदृशम् आत्मकर्तव्यं विवेकवारिणा प्रतीक्षमाणः संरक्षन्नभिषिञ्चति स जनः समृद्धफलं शरदृताववाप्नोति। तेनैव क्रमेण निरतं फलति समृद्धां क्रियां याति। तस्य कार्यं कदापि निष्फलं न सङ्गच्छते।

**मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम्।**
**सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम्॥**

**अन्वयः -** मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनां सुकृतः परिशुद्ध आगमः दीप इव अर्थदर्शनं कुरुते।

**भावार्थः -** अन्धकारेण समः संशयेनाच्छादिते दुर्ज्ञेये कार्यानुष्ठाने विचारशीलानां जनानाम् अभ्यस्तं निश्चितं शास्त्रं दीपसदृशं यथार्थवस्तुनः दर्शनं कारयति।

**स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः।**
**विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः॥**

**अन्वयः -** स्पृहणीयगुणैः महात्मभिः चरिते वर्त्मनि मनः यच्छतां विधिहेतुः आगसां अहेतुः विनिपातः अपि समुन्नतेः समः।

**भावार्थः -** स्पृहणीयगुणैः = लोकश्लाघ्यैर्गुणैर्महात्मभिः साधुभिश्चरितेऽनुष्ठिते वर्त्मनि आचारे मनो यच्छतां पुरुषाणां दैविकानर्थोऽपि (अपराधयुक्तोऽनर्थोऽपि) समुन्नतेः तुल्यं भवति।

**बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः।**
**क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः॥**

**अन्वयः -** बलवान् अपि यः कोपजन्मनः तमसः अभिभवं नः रुणद्धि सः क्षयपक्षः सकलाः ऐन्दवीः कलाः इव शक्तिसम्पदः हन्ति।

**भावार्थः -** बलवाञ्छूरोऽपि यो नृपः क्रोधोत्पन्नम् अन्धकारं न नाशयति सः शूरोऽपि स्वस्य सकलं सामर्थ्यं वैभवञ्च नाशयति। यथा कृष्णपक्षः चन्द्रमसः षोडशकलां विनाशयति। अतः क्रोधोत्पन्नान्धकारो नाशयितव्य इत्यर्थः।

**समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम्।**
**अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः॥**

**अन्वयः -** यः समवृत्तिः समये मार्दवं तिग्मतां च तनोति सः मेदिनीपतिः विवस्वान् इव ओजसा लोकम् अधितिष्ठति।

**भावार्थः -** यः राजा समभावापन्नः सन् समये मृदुवृत्तित्वं तीक्ष्णवृत्तित्वञ्च आवश्यकतानुसारं तनोति, सः अधिपतिः सूर्यमिव स्वविक्रमेण आसंसारम् आक्रामयति, लोकमधितिष्ठति च। यथा रविरपि ऋतुभेदेन समवृत्तिं प्राप्नोति।

**श्रुतमप्यधिगम्य ये रिपून्विनयन्ते न शरीरजन्मनः।**
**जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाशयम्॥**

**अन्वयः -** ये श्रुतम् अधिगम्य अपि शरीरजन्मनः रिपून् न विनयन्ते, ते अचिराय सम्पदां चापलाश्रयम् अयशः जनयन्ति खलु।

**भावार्थः -** ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनो देहप्रभवान् रिपून् कामक्रोधलोभादीन् न नियच्छन्ति, ते खलु अचिराय सम्पदाम् अस्थैर्यनिबन्धनम् अयशः दुष्कृतिं जनयन्ति।

**अभ्यासप्रश्नाः**

1. संस्कृतविद्वत्समाजे भारवेः कृते कानि-कानि आभणकानि प्रसिद्धानि ?

2. किरातार्जुनीयमहाकाव्यस्य रचयिता कः ? तस्मिन् कति सर्गाः सन्ति ?

3. अधोलिखितानां श्लोकानां भावार्थं संस्कृतभाषया लिखत –

    1. मतिभेदमस्तिरोहिते...............दूवार्थदर्शनम् ।

    2. बलवानपि...............स शक्तिसम्पदः ।

    3. श्रुतमप्यधिगम्य...........चापलाशयम् ।

# चतुर्दशः पाठः

## गोरक्षणम्

भारतसंविधानस्य राजनीतिनिर्देशकत्वेषु अन्यतमे अष्टचत्वारिंशत्तमे (४८) अनुच्छेदे गवाम्, वत्सानां दोह्यानाञ्च प्रजातीनां रक्षणाय निर्देशः प्रदत्तो वर्तते। संस्कृतसुभाषितेष्वपि गवां रक्षणाय निर्देशो दत्तोऽस्ति। न केवलमिदम्, तत्प्रजातीनां रक्षणं धार्मिकदृष्ट्या क्रियते। अपि तु राष्ट्रस्यार्थिक-विकासाय, स्वास्थ्यदृष्ट्यापि गवां दोह्यानां तत्प्रजातीनाञ्च संरक्षणमावश्यकमिति संस्कृतसुभाषितेषु शास्त्रग्रन्थेषु चोच्यते। तद्यथोक्तम् -

**तेजसा वपुषा चैव गावो वह्निसमा भुवि।**
**गावो हि सुमहत्तेजः प्राणिनां च सुखप्रदाः॥**
**बुद्धिमाकाङ्क्षता नित्यं गावः कार्याः प्रदक्षिणाः॥**

सुदक्षिणादिलीपयोः नन्दिनीसेवामुद्दिश्य वसिष्ठोक्तः गोसेवाक्रमोऽत्र प्रास्तुत्यं भजते सुभाषितत्वात्, गोवंशनिर्वहणस्य तत्र काव्ये वर्णितत्वाच्च। तद्यथोक्तम् -

**प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः।**
**निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः॥**
**प्रयातां प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि।**

*(रघुवंशम् - १.८९,९०)*

अनुक्षणं नन्दिन्याः गोः आवश्यकताः पूरय, जलतृणादिदानेन रक्षय चेति रघुवंशे उक्तम्। तत्रैव द्वितीयसर्गे राजकृतां सेवामाह इत्थम् -

**आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च।**
**अव्याहतः स्वैरगतेः स तस्याः सम्राट्-समाराधनतत्परोऽभूत्॥**
**स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।**
**जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्॥**

अत्र श्लोकद्वयेन भारतीयपरम्परायां गोसेवा तद्रक्षणं च कथं करणीयमिति प्रकाशितमस्ति। 'तृणदानोपचाराभ्यां कपिलामपि पूजयेत्' इति सहस्रशः वर्षेभ्यः पूर्वं भारतात् सुदूरे आदिशता काम्बोजियादेशराजेन यशोवर्मणा गवां पालनेऽनुसरणीयो व्यवहारो निर्दिष्टः। अपि च गवां पालननिर्वहणविषये इत्थमुपदिष्टमस्ति -

**सन्ताड्या न तु पादेन गवां मध्ये न च व्रजेत्।**

**मङ्गल्यायतनं देव्यः तस्मात्पूज्याः सदैव हि॥**

**प्रचारे वा निवाते वा बुधो नोद्वेजयेत गाः।**

**तृषिता ह्यभिवीक्ष्यन्त्यो नरं हन्युः सबान्धवम्॥**

गोधनं राष्ट्रधनं हि विटपर्वण्युच्यते। गावः क्षीरेण, घृतेन च लोकं धारयन्ति, ताः कृषिकार्योपकारितया धान्यानि बीजानि च जनयन्ति, यज्ञयागादीन् जनाः घृताहुतिभिः प्रवर्तयन्ति। गाव एव मुनीनां धारणे प्रधानं कारणम्, क्षुत्तृष्णापीडिता बलीवर्दाः भारान् वहन्ति, ते बलीवर्दाः वस्तूनाम् आनयने प्रेषणे च सूक्ष्मपथेऽपि महदुपकुर्वन्ति।

आयुर्वेदग्रन्थे गव्यस्य महत्त्वमित्थमभ्यधायि -

**गव्यं पवित्रं च रसायनं च पथ्यं च हृद्यं बलबुद्धिदं स्यात्।**

**आयुःप्रदं रक्तविकारहारि त्रिदोषहृद्रोगविषप्रदं स्यात्॥**

एतादृशानां गवां संरक्षणम्, तासां राष्ट्रविकासे दयापूर्णदृष्ट्या योजनं च संस्कृत-सुभाषितेषूक्तरीत्या च भवेत्।

**अभ्यासप्रश्ना:**

1. संविधानस्य कतमेऽनुच्छेदे गोरक्षणस्य निर्देशो विद्यते ?
2. भारतीयसंस्कृतौ गो: स्थानं किमस्तीति संस्कृतगिरा विशदयत ।
3. का: हविषा पयसा च प्रजा: धारयन्ति ?
4. गाव: किमर्थं पूज्या: भवन्ति ?
5. तृषिता ह्यभिवीक्ष्यन्त्यो गाव: कं हन्यु: ?

# पञ्चदशः पाठः

## भारतीयाः प्राचीनाः वैज्ञानिकाः

"विज्ञानमधीते विज्ञानं वेत्ति वा" इत्यस्मिन्नर्थे विज्ञानशब्दात् ठक्-प्रत्यये "वैज्ञानिकः" इति शब्दो निष्पद्यते। पाठेऽस्मिन् केषाञ्चन वैज्ञानिकानां सामान्यः परिचयः प्रस्तूयते।

### आर्यभट्टः

एको महान् गणितज्ञः, ज्योतिर्विद् च आर्यभट्टो बभूव। षट्सप्तत्युत्तरचतुश्शततमे वर्षे (४७६) मगधदेशे आर्यभटो जनिमलभत इति तेनैव प्रणीते 'आर्यभटीयम्' इत्याख्ये ग्रन्थे उल्लेखोऽस्ति। अयं वैज्ञानिकः त्रयोविंशे वयसि एव आर्यभटीयं विरचयामास। अयं शून्याविष्कारेण जगति प्रसिद्धिम् अवाप्नोत्।

### वराहमिहिरः

वराहमिहिरः प्रसिद्धः वेदज्ञः, ज्यौतिषिकः गणितज्ञश्च आसीत्। अयं उज्जयिनीसमीपे कपित्थके (कायथा) ग्रामे अजायत। स पितुः आदित्यदासाद् गणितं ज्योतिषशास्त्रं च अधिजगे। वराहमिहिरेण बृहत्संहिता, बृहज्जातकम्, लघुजातकम्, पञ्चसिद्धान्तिका इति ग्रन्थाः प्रणीताः। एतेषु ग्रन्थेषु अनेन न केवलं खगोलज्ञानम् उपादिशत्, अपि तु भूमेः गोलत्वम्, गुरुत्वाकर्षणसिद्धान्तम्, पर्यावरणविज्ञानम्, जलविज्ञानम्, उदकार्गलविज्ञानम्, भूविज्ञानमपि सविस्तरं प्रत्यपादयत्। पञ्चसिद्धान्तिकायां वराहमिहिरेण पूर्वकाले प्रचलितानां पञ्च सिद्धान्तान् पितामह-पौलिश-रोमक-वसिष्ठ-सूर्य-सिद्धान्तान् आश्रित्य विस्तृतं विवरणं प्रदत्तमस्ति। अद्यतनी पास्कलत्रिकोणमितिः वराहमिहिरस्य त्रिकोणमितिम् अनुगच्छति। बृहत्संहितायां वास्तुविद्याम्, वायुमण्डलम्, वृष्टिविज्ञानम्, मुहूर्तविज्ञानम्, वृक्षायुर्वेदं च अधिकृत्य वैज्ञानिकं चिन्तनं विहितम्। आधुनिकानां वैज्ञानिकानां कृते अपि अस्य अनेके सिद्धान्ताः अद्यापि प्रेरकाः सन्ति।

### महर्षिः कणादः

प्रसिद्धः वैज्ञानिकः महर्षिः कणादः वैशेषिकसूत्राणि व्यरचयत्। ईसवीयवर्षतः ५०० वर्षेभ्यः पूर्वं परमाणुः, द्व्यणुकम्, त्र्यणुकम्, ततश्च उत्पत्तिप्रक्रियायाम्, परमाणुः एव सूक्ष्मतमः भागः इति च व्याचख्यौ। वेगसिद्धान्तम्, गतिसिद्धान्तं च प्रतिपादितवान्। अयं महर्षिः पृथिव्याः गुरुत्वाकर्षणशक्तेः अन्वेष्टा अस्ति।

## महर्षिः भृगुः

महाभारतस्य शान्तिपर्वणः १८४ तमे अध्याये महर्षेः भारद्वाजस्य भृगोः च संवादे भृगुः भारद्वाजस्य कृते उत्तरं प्रददाति यद् वृक्षाः न चैतन्यविहीनाः, ते चैतन्यवन्त एव, तेषु जीवं वयं पश्याम इति च।

भृगोः सिद्धान्तेन सदृशतया वृक्षाणां चैतन्यविषये प्रयोगशालासु प्रयोगाः कृताः। जगदीशचन्द्रबसुमहोदयेन नोबेलपुरस्कारः लब्धश्च।

## महर्षिः चरकः

महर्षिः चरकः जगति वैद्यशास्त्रविद् विविधरोगाणाम् औषधानां च अभिज्ञ इति लब्धख्यातिः वर्तते। महर्षिः चरकः चिकित्सायाः विधानानि वैद्यकशास्त्रे चरकसंहितायां न्यरूपयत्। असौ अग्निवेशाद् गुरोः प्राप्तं वैद्यज्ञानं वैद्यशास्त्रसंहितायां समायोजयत्। सा च ‘चरकसंहिता’ इति नाम्ना प्रसिद्धिम् अवाप। अत्र विंशत्युत्तरैकशतम् (१२०) अध्यायाः, अष्टौ स्थानानि च सन्ति। सूत्र-निदान-विमान-शरीर-इन्द्रिय-चिकित्सा-कल्प-सिद्धिस्थानाख्यानि अष्टौ सन्ति विभागाः।

## महर्षिः सुश्रुतः

महर्षिरयं शल्यचिकित्सायाः जनकत्वेन जगति प्रख्यातः वर्तते। ‘सुश्रुतसंहिता’ इति अधुना प्रसिद्धम्, धन्वन्तरेः सकाशात् प्राप्तं ज्ञानं ग्रन्थे विलिख्य तत्र शस्त्रचिकित्साविधानम् अवोचत्। अत्र सूत्र-निदान-शारीर-चिकित्सा-कल्पस्थानाख्यानि पञ्च विभागाः, १२० अध्यायाश्च सन्ति।

## आचार्यः पालकाप्यः

आचार्यः पालकाप्यः हस्त्यायुर्वेदस्य कर्ता। हस्त्यायुर्वेदः गजशास्त्रम् इति पालकाप्यमुनिना प्रणीतौ प्राचीनतमौ ग्रन्थौ स्तः। हस्त्यायुर्वेदे गजानां वयः, तेषु जलवायुप्रभावः, तेषां स्वभावः, तेषु उत्पन्ना विकाराः, विकारकारणानि, लक्षणानि, ३१५ सङ्ख्याकाः हस्तिरोगाः, तेषाम् उपचारः, औषधनिर्माणप्रक्रिया च वर्णिता विद्यन्ते। हस्त्यायुर्वेदसंहितायां चत्वारः खण्डाः षष्ठ्युत्तरैकशतम्(१६०) अध्यायाः, द्वादश सहस्रं श्लोकाः च सन्ति। आधुनिक-कालिकस्य “वेटेरनेरी सायन्स” (पशुचिकित्साविज्ञानम्) इत्यस्य पूर्वभावि इदं हस्त्यायुर्वेदविज्ञानं भारतीयानाम् ऋषीणां मूलभूतं चिन्तनं प्रस्तौति।

## महर्षिः भरद्वाजः

भरद्वाजमहर्षेः 'यन्त्रसर्वस्वम्', 'अंशुमत्तन्त्रं' च इत्येतौ द्वौ ग्रन्थौ यन्त्रशास्त्रसम्बद्धौ स्तः। महर्षिणा भरद्वाजेन ग्रन्थद्वयेऽस्मिन् यन्त्राणां विषये बहुविधा नियमाः वर्णिताः सन्ति। आत्रेय-पुनर्वसवे कायचिकित्सां महर्षिः भरद्वाजः उपदिदेश इति चरकसंहितायाम् उल्लेखो वर्तते।

## मुनिः पाराशरः

कृषिपाराशरः इति प्रसिद्धं वैज्ञानिकं कृषिशास्त्रं महामुनिः पाराशरः रचयामास। अस्मिन् पुस्तके षट्काण्डाः सन्ति (१) बीजोत्पत्तिकाण्डम् (२) वानस्पत्यकाण्डम् (३) गुल्मकाण्डम् (४) वनस्पतिकाण्डम् (५) वीरुत्-वल्लीकाण्डम् (६) चिकित्साकाण्डम् इति च। सम्पूर्णस्य कृषिविज्ञानस्य वैज्ञानिककृषिपद्धतेः च सुविस्तृतं चिन्तनम् अस्मिन् ग्रन्थे उपलभ्यते।

## भास्कराचार्यः

भास्कराचार्यः प्राचीनभारतस्य सुप्रसिद्धः एकः गणितज्ञः ज्यौतिषिकश्च आसीत्। अनेन विरचितः प्रधानो ग्रन्थो भवति सिद्धान्तशिरोमणिः इति। यत्र लीलावती, बीजगणितम्, ग्रहगणितम्, गोलाध्यायः चेति एते चत्वारो भागाः सन्ति। एषु चतुर्षु भागेषु अङ्कगणितम्, बीजगणितम्, ग्रहगतिगणितम्, गोलसम्बद्धं गणितं च सम्यक् चिन्तितानि वर्तन्ते।

## बोधायनाचार्यः

आचार्यः बोधायनः भारतवर्षस्य प्राचीनेषु गणितज्ञेषु अन्यतमः, बोधायनशुल्बसूत्रस्य बोधायनश्रौतसूत्रस्य च प्रणेता बभूव। भारतीयरेखागणितज्ञो बोधायनाचार्यो ज्यामितेः महत्त्वपूर्णान् नियमान् प्रत्यपादयत्। रेखागणितज्ञरूपेण अयमाचार्यः आविश्वं ख्यातिं लेभे। बोधायनस्य शुल्बसूत्रेषु यज्ञकुण्डनिर्माणे रेखागणितानुसारं रज्जुप्रयोगो दृश्यते। बोधायनश्रौतसूत्रे श्रुत्युक्तकर्मणां चिन्तने वैज्ञानिकानि चिन्तनानि दृश्यन्ते।

इत्थं नैके विज्ञानविदः ऋषयः आचार्याश्च नानाविधेषु विषयेषु अन्वेषणं विधाय बहून् विज्ञानग्रन्थान् प्रणिन्युः। तेषां ग्रन्थानाम् अध्ययनेन भारतीया विज्ञानपरम्परा विज्ञानक्षेत्रे भारतीयानाम् ऋषीणां योगदानं च ज्ञायते।

**अभ्यासप्रश्ना:**

1. वैज्ञानिक: इति शब्द: कथं निष्पद्यते ?
2. चरकसंहितायां कति स्थानानि सन्ति ? कानि च तानि ?
3. निम्नलिखितानामाचार्याणां परिचय: संक्षेपेण लिखत –

   आर्यभट:, कणाद:, सुश्रुत:, पराशर:, पालकाव्य:

# षोडशः पाठः

## वेदगणितज्ञः

गणितविषये भारतवर्षस्य योगदानं विश्वस्मिन्नस्ति अतुलनीयम्। शून्य-स्थानीयमान-अङ्कगणित-ज्यामिति-बीजगणितादीनां प्रारम्भिकं कार्यं भारते एव सम्पन्नम् इति विश्वमिदं सर्वदा अङ्गीकरोति। वेदेषु तात्कालिकेषु ग्रन्थेषु च विशिष्य गणितीयांशानां सन्निवेशो दृश्यते। आधुनिकेषु गणितवित्सु वेदगणितस्य साक्षात्कर्ता आसीत् श्रीमान् भारतीकृष्णतीर्थस्वामिमहोदयः। 'धार्मिकग्रन्थेष्वपि वैज्ञानिकविषयाः सन्निविष्टाः सन्ति' इति सर्वप्राथम्येन स्वामिमहोदयेन भणितम्।

गणितवेत्ता स्वामिवर्यः चतुरशीत्युत्तराष्टादशशततमे (१८८४) वर्षे मार्च-मासस्य चतुर्दशे (१४) दिनाङ्के तमिलनाडुप्रदेशस्य तिरुन्नवल्लीनामके ग्रामे जन्म अलभत। एषः बाल्यादेव मेधावी, तीक्ष्णबुद्धिः श्रद्धालुः, कक्ष्यासु सर्वदा प्रथमः, जिज्ञासुः च बभूव। अयं यदा दशमीपरीक्षाम् उत्तीर्णवान् तदा मद्रासससंस्कृतसङ्घेन एतस्य पाण्डित्यं दृष्ट्वा 'सरस्वती' इत्युपाधिना विभूषितः। ततः पश्चात् पदवीशिक्षणं समाप्य अमेरिका-महाविविद्यालयस्य मुम्बयिकेन्द्रे उन्नतश्रेण्याम् आचार्यपरीक्षाम् उदतरत्।

अध्ययनात् परमेष महान् विद्वान् राजमहेन्द्रनगरस्य राष्ट्रियमहाविद्यालये प्राध्यापकत्वेन कार्यम् अकरोत्। आध्यात्मिकविषये समाकृष्टोऽयं श्रृङ्गेरिस्थं शारदापीठमागम्य श्रीसच्चिदानन्दशिवाभिनव-नृसिंहभारतीनां गुरूणां सन्निधौ अध्ययनं प्रारभत। ततः नवनवत्युत्तरनवदशशततमे (१९९९) वर्षे संन्यासाश्रमः स्वीकृतः। तत्र श्रृङ्गगिरावेव अष्ट वर्षाणि यावदरण्ये तपः आचरितवता अनेन ध्यानावस्थायां वैदिकगणितस्य सूत्राणां साक्षात्कारो जातः। तदनन्तरम् अयम् अथर्ववेदे गणितविषये विद्यमानान् विविधान् शब्दान् उपयुज्य षोडशमुख्यसूत्राणि संशोधयामास। इमानि सूत्राणि उपयुज्य बीजगणितस्य अङ्कगणितस्य रेखागणितस्य च विविधाः समस्याः अनायासेन समाधातुं शक्यन्ते।

अष्टापञ्चाशदधिकनवदशशततमे (१९५८) वर्षे अमेरिकाविश्वविद्यालये वैदिकगणितविषयं धार्मिकविषयं भारतीयसंस्कृतिविषयञ्च उपन्यस्य द्वितीयविवेकानन्दः इति प्रसिद्धिमाप्नोत्। षोडशसूत्रव्याख्यानग्रन्थः सम्प्रत्यपि "वैदिक् मेथमेटिक्" इति नाम्ना आङ्ग्लभाषायाम् उपलभ्यते।

**अभ्यासप्रश्ना:**

1. श्रीभारतीकृष्णतीर्थस्वामिवर्यस्य परिचय: संस्कृतभाषया दशवाक्यै: विवेचयत ।
2. षोड़श सूत्राणि अवलम्ब वैदिकगणितस्य वैशिष्ट्यं प्रतिपादयत ।

3. भारतीयगणितपरम्परा कीदृशी अस्ति ?

4. गणितीयांशानां सन्निवेशः कुत्र दृश्यते ?

# सप्तदशः पाठः

## संविधाननिर्माता अम्बेडकरमहोदयः

डॉं. भीमराव-अम्बेडकर-महोदयः जन्म एकनवत्यधिकाष्टादशशततमस्य (१८९१) वर्षस्य अप्रैलमासस्य चतुर्दशे दिनाङ्के (१४.४.१८९१) मध्यप्रान्तस्य महु इति स्थाने अलभत। भीमरावस्य पिता रामजी माता च भीमाबाई आस्ताम्।

भीमस्य अध्ययनकाले महाविद्यलये 'अम्बावाडेकरः' नामकः एकः अध्यापकः आसीत्। वात्सल्यातिशयेन अध्यापकः भीमनाम्ना सह अम्बावाडेकरः इति पदं व्यवहृतवान्। ततः परं भीमरावः अम्बेडकरनाम्ना प्रसिद्धो बभूव।

भीमरावः १९०८ तमे वर्षे मुम्बई-विश्वविद्यालयात् अत्युच्चश्रेण्यां दशमीं- मेट्रिक्युलेशन् इति संज्ञिताम् उत्तीर्णवान्। १९१२ वर्षे राजनीतिशास्त्रे अर्थशास्त्रे च मुम्बई-विश्वविद्यालयस्य एल्फिन्स्टन्-महाविद्यालयात् स्नातकोपाधिं भीमरावः प्राप्नोत्, वडोदरा-नगरे भीमरावमहोदयः सेवायां नियुक्तः। ततः परम् अम्बेडकरमहोदयः वडोदरा-महाराजात् अमेरिका-देशे उच्चतराध्ययनाय अध्येतृवृत्तिं प्राप्य तत्र प्रसिद्धे कोलम्बिया-विश्वविद्यालये अध्ययनम् अकरोत्।

असौ अध्ययनान्ते 'पुरातनभारतीयवाणिज्यम्' इति लेखं विलिख्य १९१५ वर्षे स्नातकोत्तरपदवीम् अलभत। एवं 'ब्रिटिश-भारते प्रादेशिकायस्य ऐतिहासिकं विवरणात्मकञ्च अध्ययनम्' इति महाप्रबन्धं विरचय्य कोलम्बिया-विश्वविद्यालयात् पिएच्.डि इति उपाधिमलभत। एषः लण्डननगरं गत्वा न्यायशास्त्रे 'ब्यारिष्टर' पदवीं च अलभत। अम्बेडकरमहोदयः १९२३ वर्षस्य अप्रैल मासे भारतं प्रत्यागच्छत्। तथा जातिगतस्य अस्पृश्यभावस्य दूरीकरणाय, शोषितजनानां क्लेशपरिहाराय च सन्नद्धः अभूत्। स तदा जातिगतम् अस्पृश्यभावं सर्वदा विरुणद्धि स्म।

संविधानसभायाः सदस्यत्वेन वङ्गप्रदेशतः चितः अम्बेडकरमहोदयः, भारतसर्वकारस्य प्रथमः विधिमन्त्री अभूत्, संविधान-निर्माण-सभायाः अपि अध्यक्षत्वेन चितश्च। स भारतीयसंविधानम् व्यरचयत्। "आधुनिक-भारतस्य न्यायशास्त्र-प्रणेता" इति सम्मानञ्च अलभत।

अम्बेडकरमहोदयो भारतीयसंविधानस्य सप्तदशे अनुच्छेदे कथमपि अस्पृश्यतायाः अनुसरणं दण्डनीयः अपराध इति निरदिशत् । पञ्चविंशाद् अनुच्छेदात् अष्टाविंशानुच्छेदपर्यन्तं धार्मिकस्वतन्त्रतायाः विधानं, अष्टाविंशाद् अनुच्छेदात् त्रिंशानुच्छेदपर्यन्तं शिक्षायाः, संस्कृतेः संरक्षणाय च मूलाधिकारविधानम् अकरोत्।

अम्बेडकरमहोदस्य विशिष्टां देशसेवां परिगणय्य भारतसर्वकारः भारतरत्नम् इत्युपाधिना जन्मशताब्दसमये सममानयत्।

नानाभाषाणां ज्ञाता डा. अम्बेडकरमहोदयः संस्कृतभाषायाः गरिमाणमपि सम्यक् जानाति स्म। अम्बेडकरमहोदयः संस्कृतग्रन्थानां स्वाध्यायमपि सम्यक् अकरोत् इत्येतदपि ऐतिहासिकं सत्यमस्ति। सर्वग्राहिणी सर्वभाषापोषिणी च संस्कृतभाषा स्वतन्त्रभारतस्य राष्ट्रभाषा भवितुम् अर्हति। अनया भाषयैव भारतस्य अखण्डत्वं राष्ट्रैक्यं च सम्भवति, अन्यथा विविधप्रदेशेषु विविधभाषाकलहाः भवेयुः इति तस्य विचारः आसीत्।

१९४९ तमवर्षस्य सितम्बरमासस्य एकादशदिनाङ्के 'नैशनल हेरल्ड' इति पत्रिकायां संस्कृतभाषासमर्थकः डॉ. भीमरावः इति शीर्षकं प्रकाशितमासीत्। संस्कृतभाषा राजभाषा भवेदिति प्रस्तावयितृषु सर्वप्रथमः हस्ताक्षरकर्ता डॉ. अम्बेडकरमहोदयः आसीत्। वेदानां, पुराणानां, उपनिषदां वा अध्ययनं भारतस्य सांस्कृतिकमध्ययनम् अस्ति, चिरात् सर्वत्र भारते संस्कृतिः इति अध्ययनं प्रवर्तते। अत एव धार्मिकाध्ययनम् इति व्याजेन सर्वकारीयविद्यालयेषु वेदानां, पुराणानां, उपनिषदां वा अध्ययनस्य निषेधः न कर्तुं शक्यते इति डॉ. अम्बेडकरमहोदयः संविधानसभायाम् उत्तरम् अदात्। अतः संस्कृतस्य वेदादीनां शुभचिन्तकः सः डॉ. अम्बेडकरमहोदयः आसीत् इति ज्ञायते।

निम्नवर्गाणां, शोषितजनानां च कृते सामाजिकन्यायस्य प्रदाता, व्यक्तिस्वातन्त्र्यस्य प्रतिपादकः डॉ. अम्बेडकरमहोदयः १४ अक्तूबर १९५६ दिनाङ्के बौद्धधर्मं स्वीचकार, ६ दिसम्बर १९५६ दिनाङ्के महापरिनिर्वाणं च जगाम।

**अभ्यासप्रश्नाः**

1. संस्कृतभाषाविषये अम्बेडकरमहोदयस्य चिन्तनं प्रकटयत ।
2. अम्बेडकरमहोदयस्य जीवनपरिचयं दशवाक्यैः लिखत ।
3. संविधानस्य कतमेऽनुच्छेदे अस्पृश्यताया अनुसरणं दण्डनीय अपराधः इति परिगण्यते ?
4. भीमरावस्य सुसंस्कारवर्धकाः हेतवः के अभवन् ?

# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

## माध्यमेन सञ्चालिता प्रस्ताविता च राष्ट्रीयादर्शवेदविद्यालयः




## महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in